# Tarka Sangraha 1-8

# તર્કસંગ્રહ અધ્યાય ૧ - ૮

## Document Information

Text title : tarkasangraha

File name : tarkasangraha.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Annambhatta

Transliterated by : Ashish Chandra ashish_chandr70 at hotmail.com

Proofread by : Ashish Chandra ashish_chandr70 at hotmail.com

Description-comments : Stepping stone for understanding the Nyaya-Vaisheshika systems of logic.

Latest update : August 28, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Tarka Sangraha 1-8

# તર્કસંગ્રહ અધ્યાય ૧ - ૮

## અથ પ્રથમોઽધ્યાય ।

નિધાય હૃદિ વિશ્વેશં વિધાય ગુરુવન્દનમ્ ।
બાલાનાં સુખબોધાય ક્રિયતે તર્કસંગ્રહ ॥ ૧ ॥

દીપિકા
વિશ્વેશ્વરં સામ્બમૂર્તિં પ્રણિપત્ય ગિરાં ગુરુમ્ ।
ટીકાં શિશુહિતાં કુર્વે તર્કસંગ્રહદીપિકામ્ ॥

ચિકીર્ષિતસ્ય ગ્રનથસ્ય નિર્વિઘ્નપરિસમાપ્ત્યર્થં શિષ્ટાચારાનુમિતશ્રુતિબોધિતકર્તવ્યતાક્-ઇષ્ટદેવતાનમસ્કારાત્મકં મઙ્ગલં શિષ્યશિક્ષાયૈ ગ્રન્થતો નિબધ્નંશ્ચિકીર્ષિતં પ્રતિજાનીતે ।

નિધાયેતિ । નનુ મઙ્ગલસ્ય સમાપ્તિસાધનત્વં નાસ્તિ । મઙ્ગલે કૃતેઽપિ કિરણવલ્યાદૌ સમાપ્ત્યદર્શનાત્, મઙ્ગલાભાવેઽપિ કાદમ્બર્માદૌ સમાપ્તિદર્શનાચ્ચ અન્વયવ્યતિરેકાભ્યાં વ્યભિચારાદિતિ ચેત્ ન । કિરણાવલ્યાદૌ વિઘ્નબાહુલ્યાત્સમાપ્ત્યભાવઃ । કાદમ્બર્યાદૌ ગ્રન્થાદ્બહિરેવ

મઙ્ગલં કૃત્મતો ન વ્યભિચારઃ । નનુ મઙ્ગલસ્ય (ગ્રન્થાદૌ) કર્તવ્યત્વે કિં પ્રમાણમિતિ ચેત્ ન । શિષ્ટાચારાનુમિતશ્રુતેરેવ્ પ્રમાણત્વાત્ । તથા હિ મઙ્ગલં વેદ-બોધિત્કર્તવ્યતાકમલૌકિકાવિગીતશિષ્ટાચારવિષયત્વાદ્દર્શાદિવત્ । ભોજનાદૌ વ્યભિચાર વારણાય અલૌકિકેતિ । રાત્રિશ્રાદ્ધાદૌ વ્યભિચારવારણાય અવિગીતેતિ । શિષ્ટપદં સ્પષ્ટાર્થમ્ । ન કુર્યાન્નિષ્ફલં કર્મ ઇતિ જલતાડનાદેરપિ નિષિદ્ધત્વાત્ । તર્ક્યન્તે પ્રતિપાદ્યન્તે ઇતિ તર્કાઃ દ્રવ્યાદિપદાર્થાસ્તેષાં સંગ્રહઃ સંક્ષેપેણ સ્વરૂપકથનં ક્રિયત ઇત્યર્થઃ । કસ્મૈ પ્રયોજનાયેત્યત આહ । સુખબોધાયેતિ । સુખેનાનાયાસેન યો બોધઃ પદાર્થજ્ઞાનં તસ્મા ઇત્યર્થઃ ।

નનુ બહુષુ  તર્કગ્રથેષુ સત્સુ કિમર્થમ્પૂર્વોઽયં ગ્રન્થઃ ક્રિયત
ઇત્યત આહ । બાલાનામિતિ । તેષામતિવિસ્તૃતત્વાદ્બાલાનાં બોધો ન જાયત
ઇત્યર્થઃ । ગ્રહણધારણપુટુર્બાલઃ ન તુ સ્તનન્ધયઃ । કિં કૃત્વા
ક્રિયત ઇત્યત આહ । નિધાયેતિ । વિશ્વેશં જગન્નિયન્તારમ્ । હૃદિ નિધાય

નિતરાં સ્થાપયિત્વા સદા તદ્ધ્યાનપરો ભૂત્વેત્યર્થઃ । ગુરૂણાં
વિદ્યાગુરૂણાં,વન્દનં નમ્સ્કારં, વિધાય કૃત્વેત્યર્થઃ ॥

દ્રવ્યગુણકર્મસામાન્યવિશેષસમવાયાઽભાવાઃ સપ્તપદાર્થાઃ ॥ ૨ ॥

દીપિકા

પદાર્થાન્ વિભજતે । દ્રવ્યેતિ । પદસ્યાર્થઃ પદાર્થઃ ઇતિ
વ્યુત્પત્ત્યાભિધેયત્વં પદાર્થસામાન્યલક્ષણમ્ (લભ્યતે) । નનુ
વિભાગાદેવ સપ્તત્વે સિદ્ધે સપ્ત (પદ) ગ્રહણં વ્યર્થમિતિ ચેત્,
ન અધિકસંખ્યાવ્યવચ્છેદાર્થકત્વાત્ । નન્વતિરિક્તઃ પદાર્થઃ
પ્રમિતો વા ન વા । નાઽદ્યઃ પ્રમિતસ્ય નિષેધાયોગાત્ । ન દ્વિતીયઃ
પ્રતિયોગિપ્રમિતિં વિના નિષેધાનુપપત્તેરિતિ ચેત્, ન । પદાર્થત્વં
દ્રવ્યાદિસપ્તાન્યતમત્વવ્યાપ્યમિતિ વ્યવચ્છેદાર્થકત્વાત્
(સપ્તગ્રહણમ્) । નનુ સપ્તાન્યતમત્વં સપ્તભિન્નભિન્નત્વમિતિ
વક્તવ્યમ્ । સપ્તભિન્નસ્યાપ્રસિદ્ધ્યા કથં સપ્તાન્યતમત્વવ્યાપ્તિનિશ્ચય
ઇતિ ચેત્, ન । દ્રવ્યાદિસપ્તાન્યતમત્વં નામ
દ્રવ્યાદિભેદસપ્તકાભાવવત્ત્વમ્ । અતો દોષવિરહાત્ । એવમગ્રેઽપિ
દ્રષ્ટવ્યમ્ ॥

તત્ર દ્રવ્યાણી પૃથિવ્યપ્તેજોવાય્વાકાશકાલદિગાત્મમનાંસિ નવૈવ ॥ ૩ ॥

દીપિકા

દવ્યં (દ્રવ્યાણિ) વિભજતે । તત્રેતિ । તત્ર દ્રવ્યાદિમધ્યે ।
દ્રવ્યાણિ નવૈવેત્યન્વયઃ । કાનિ તાનિ ઇત્યત આહ । પૃથિવીતિ । નનુ તમસો

દશમદ્રવ્યસ્ય વિદ્યમાનત્વાત્કથં નવૈવ દ્રવ્યાણીતિ । તથા હિ । નીલં
તમશ્ચલતીત્યબાધિતપ્રતીતિબલાન્નીલરૂપાધારતયા ક્રિયાધારતયા ચ
તમસો દ્રવ્યત્વં તાવ્ત્ સિદ્ધમ્ । તત્ર તમસો નાકાશાદિપઞ્ચકેઽન્તર્ભાવઃ
રૂપવત્ત્વાત્ । અત એવ ન વાયૌ, સ્પર્શાભાવાત્ સદાગતિમત્ત્વાભાવાચ્ચ ।

નાપિ તેજસિ, ભાસ્વરૂપાભાવાત્ ઉષ્ણસ્પર્શાભાવાચ્ચ । નાપિ જલે,
શીતસ્પર્શાભાવાત્ નીલરૂપવત્ત્વાચ્ચ । નાપિ પૃથિવ્યાં, ગન્ધાભાવાત્

સ્પર્શરહિતત્વાચ્ચ । તસ્માત્તમો દશમદ્રવ્યમિતિ ચેત્, ન । તમસસ્તેજોઽભાવરૂપત્વાત્ । તથા હિ । તમો ન રૂપિદ્રવ્યમાલોકાસહકૃતચક્ષુર્ગ્રાહ્યત્વાદાલોકાભાવવત્ । રૂપિદ્રવ્યચાક્ષુષપ્રમાયામાલોકસ્ય કારણત્વાત્ । તસ્માત્ પ્રૌઢપ્રકાશકતેજસ્સામાન્યાભાવસ્તમઃ, તત્ર નીલં તમશ્ચલતિ ઇતિ પ્રત્યયો ભ્રમઃ । અતો નવ દ્રવ્યાણીતિ સિદ્ધમ્ । દ્રવ્યત્વજાતિમત્ત્વં ગુણવત્ત્વં વા દ્રવ્યસામાન્યલક્ષણમ્ । લક્ષ્યૈકદેશાવૃત્તિત્વમવ્યાપ્તિઃ ।

યથા ગોઃ કપિલત્વમ્ । અલક્ષ્યે લક્ષણસ્ય વર્તનમતિવ્યાપ્તિઃ । યથા ગોઃ શ઼ૃઙ્ગિત્વમ્ । લક્ષ્યમાત્રાવૃત્તિત્વમસંભવઃ । યથા ગોરેકશફવત્ત્વમ્ । એતદ્દૂષણત્રયરહિતધર્મો લક્ષણમ્ । સ એવાસાધારણધર્મ ઇત્યુચ્યતે । લક્ષયતાવચ્છેદકસમનિયતત્વમસાધારણત્વમ્ । વ્યાવર્તકસ્યૈવ લક્ષણત્વે વ્યાવૃત્તાવભિદેયત્વાદૌ ચાતિવ્યાપ્તિરતસ્તદ્વારણાય તદ્ભિન્નત્વં ધર્મવિશેષણં દેયમ્ । વ્યવહારસ્યાપિ લક્ષણપ્રયોજનત્વે તન્ન દેયમ્ । વ્યાવૃત્તેરપિ વ્યવહારસાધનત્વાત્ । નનુ ગુણવત્ત્વં ન દ્રવ્યલક્ષણમ્, આદ્યક્ષણાવચ્છિન્નઘટે ઉત્પન્નવિનિષ્ટઘટે ચાવ્યાપ્તેરિતિ ચેત્, ન । ગુણસમાનાધિકરણસત્તાભિન્નજાતિમત્ત્વસ્ય વિવક્ષિતત્વાત્ । નન્વેવમપિ એકં રૂપં રસાત્પૃથક્ ઇતિ વ્યવહારાદ્રૂપાદાવતિવ્યાપ્તિરિતિ ચેત્, ન । એકાર્થસમવાયાદેવ તાદૃશવ્યવહારોપપત્તૌ ગુણે ગુણાનઙ્ગીકારાત્ ।
રૂપ-રસ-ગન્ધ-સ્પર્શ-સંખ્યા-પરિમાણ-પૃથક્ત્વ-સંયોગ-વિભાગ-પર્
અત્વા-ઽપરત્વ-ગુરુત્વ-દ્રવત્વ-સ્નેહ-શબ્દ-બુદ્ધિ-સુખ-દુઃખેચ્છા
દ્વેષ-પ્રયત્ન-ધર્માધર્મ-સંસ્કારાઃ ચતુર્વિંશતિર્ગુણાઃ ॥ ૪ ॥

દીપિકા

ગુણાન્વિભજતે । રૂપેતિ । દ્રવ્યકર્મભિન્નત્વે સતિ સામાન્યવાન્ ગુણઃ । ગુણત્વજાતિમાન્વા । નનુ લઘુત્વકઠિનત્વમૃદુત્વાદીનાં વિદ્યમાનત્વાત્ કથં ચતુર્વિંશતિર્ગુણા ઇતિ ચેત્, ન । લઘુત્વસ્ય ગુરુત્વાભાવરૂપત્વાન્મૃદુત્વકઠિનત્વયોઃ અવયવસંયોગવિશેષત્વાત્ ।
ઉત્ક્ષેપણાપક્ષેપણાકુઞ્ચનપ્રસારણગમનાનિ પઞ્ચ કર્માણિ ॥ ૫ ॥

દીપિકા

કર્મ વિભજતે । ઉત્ક્ષેપણેતિ । સંયોગભિન્નત્વે સતિ

સંયોગાસમવાયિકારણં કર્મ કર્મત્વજાતિમદ્વા । ભ્રમણાદીનામપિ ગમને અન્તર્ભાવાન્ન પઞ્ચત્વવિરોધઃ ॥

પરમપરં ચેતિ દ્વિવિધં સામાન્યમ્ ॥ ૬ ॥

દીપિકા

સામાન્યં વિભજતે । પરમિતિ । પરમધિકદેશવૃત્તિ । અપરં ન્યૂનદેશવૃત્તિ । સામાન્યાદિચતુષ્ટયે જાતિર્નાસ્તિ ॥

નિત્યદ્રવ્યવૃત્તયો વિશેષાસ્ત્વનન્તા એવ ॥ ૭ ॥

દીપિકા

વિશેષં વિભજતે । નિત્યેતિ । પૃથિવ્યાદિચતુષ્ટયપરમાણવઃ આકાશાદિપઞ્ચકં ચ નિત્યદ્રવ્યાણિ ।

સમવાયસ્ત્વેક એવ ॥ ૮ ॥

દીપિકા

સમવાયસ્ય ભેદો નાસ્તીત્યાહ । સમવાયસ્ત્વિતિ ।

અભાવશ્ચતુર્વિધઃ - પ્રાગભાવઃ, પ્રધ્વંસાભાવઃ, અત્યન્તાભાવઃ, અન્યોન્યાભાવશ્ચેતિ ॥ ૯ ॥

દીપિકા

અભાવં વિભજતે । પ્રાગભાવેતિ ।

## અથ દ્વિતીયોઽધ્યાય ।

તત્ર ગન્ધવતી પૃથિવી । સા દ્વિવિધા-નિત્યાઽનિત્યા ચ । નિત્યાઃ પરમાણુરૂપાઃ । અનિત્યાઃ કાર્યરૂપાઃ । પુનસ્ત્રિવિધાઃ શરીરેન્દ્રિય વિષયભેદાત્ । શરીરમસ્મદાદીનામ્ । ઇન્દ્રિયં ગન્ધગ્રાહકં ઘ્રાણમ્ । તચ્ચ નાસાગ્રવર્તિ । વિષયો મૃત્પાષાણાદિઃ ॥ ૧॥

દીપિકા

તત્રોદ્દેશક્રમાનુસારાત્ પ્રથમં પૃથિવ્યા લક્ષણમાહ । તત્રેતિ । નાના પદાર્થસંકીર્તનમુદ્દેશઃ । ઉદ્દેશક્રમે ચ સરવત્રેચ્છૈવં નિયામિકા । નનુ સુરભ્યસુરભ્યવયવાખ્યે દ્રવ્યે પરસ્પરવિરોધેન ગન્ધાનુત્પાદાદવ્યાપ્તિઃ । ન ચ તત્ર ગન્ધપ્રતીત્યનુપપત્તિરિતિ વાચ્યમ્ । અવયવગન્ધસ્યૈવ તત્ર પ્રતીતિસંભવેન ચિત્રગન્ધાનઙ્ગીકારાત્ કિં

ચોત્પન્નવિનષ્ટઘટાદાવવ્યાપ્તિરિતિ ચેત્ ન ।
ગન્ધસમાનાધિકરણદ્રવ્યત્વાપરજાતિમત્ત્વસ્ય વિવક્ષિતત્વાત્ । નનુ
જલાદાવપિ ગન્ધપ્રતીતિરિતિ ચેત્ ન । અન્વયવ્યતિરેકાભ્યાં
પૃથિવીગન્ધસ્યૈવ તત્ર ભાનાઙ્ગીકારાત્ । નનુ કાલસ્ય સર્વાધારતયા
સર્વેષાં લક્ષણાનાં કાલેઽતિવ્યાપ્તિરિતિ ચેત્ ન ।
સર્વાધારતાપ્રયોજકભિન્નસંબન્ધેન લક્ષણત્વસ્ય વિવક્ષિતત્વાત્ ।
પૃથિવીં વિભજતે । સા દ્વિવિધેતિ । નિત્યત્વં ધ્વંસાપ્રતિયોગિત્વમ્ ।
અનિત્યત્વં ધ્વંસપ્રતિયોગિત્વમ્ । પ્રકારાન્તરેણ વિભજતે । પુનરિતિ । આત્મનો

ભોગાયતનં શરીરમ્ । યદવચ્છિન્નાત્મનિ ભોગો જાયતે તદ્ભોગાયતનમ્ ।
સુખદુઃખસાક્ષાત્કારો ભોગઃ । શબ્દેતરોદ્ભૂતવિશેષગુણાનાશ્રયત્વે સતિ
જ્ઞાનકારણમનઃ સંયોગાશ્રયત્વમિન્દ્રિયત્વમ્ । શરીરેન્દ્રિયભિન્નો
વિષયઃ । એવં ચ ગન્ધવચ્છરીરં પાર્થિવશરીરમ્,
ગન્ધવદિન્દ્રિયં પાર્થિવેન્દ્રિયમ્, ગન્ધવાન્ વિષયઃ પાર્થિવવિષય
ઇતિ તત્તલ્લક્ષણં બોધ્યમ્ । પાર્થિવશરીરં દર્શયતિ । શરીરમિતિ ।
ઇન્દ્રિયં દર્શયતિ । ઇન્દ્રિયમિતિ । ગન્ધગ્રાહકમિતિ પ્રયોજનમ્ । ઘ્રાણમિતિ
સંજ્ઞા । નાસાગ્રેત્યાશ્રયોક્તિઃ । એવમુત્તરત્ર જ્ઞેયમ્ । પાર્થિવવિષયં
દર્શયતિ । મૃતપાષાણાદીતિ ।

શીતસ્પર્શવત્યઃ આપઃ । તા દ્વિવિધાઃ નિત્યા અનિત્યાશ્ચ । નિત્યાઃ
પરમાણુરૂપાઃ । અનિત્યાઃ કાર્યરૂપાઃ । પુનઃ ત્રિવિધાઃ
શરીરેન્દ્રિયવિષયભેદાત્ । શરીરં વરૂણલોકે । ઇન્દ્રિયં રસગ્રાહકં
રસનં જિહ્વાગ્રવર્તિ । વિષયઃ સરિત્ સમુદ્રાદિઃ ॥ ૨॥

દીપિકા

અપાં લક્ષણમાહ । શીતેતિ । ઉતપન્નવિનિષ્ટજલેઽવ્યાપ્તિવારણાય
શીતસ્પર્શસમાનાધિકરણદ્રવ્યત્વાપરજાતિમત્ત્વમ્ । “શીતં
શિલાતલમ્" ઇત્યાદૌ જલસંબન્ધાદેવ શીતસ્પર્શભાનમિતિ
નાતિવ્યાપ્તિઃ । અન્યત્સર્વં પૂર્વરીત્યા વ્યાખ્યેયમ્ ॥

ઉષ્ણસ્પર્શવત્ તેજઃ । તચ્ચ દ્વિવિધં, નિત્યમનિત્યં ચ । નિત્યં
પરમાણુરૂપમ્ । અનિત્યં કાર્યરૂપમ્ । પુનઃ ત્રિવિધં
શરીરેન્દ્રિયવિષયભેદાત્ । શરીરં આદિત્યલોકે પ્રસિદ્ધમ્ । ઇન્દ્રિયં
રૂપગ્રાહકં ચક્ષુઃ કૃષ્ણતારાગ્રવર્તિ । વિષયઃ ચતુર્વિધઃ,

ભૌમ-દિવ્ય-ઔદર્ય-આકરજભેદાત્ । ભૌમં વહ્નયાદિકમ્ । અબિન્ધનં
દિવ્યં વિદ્યુદાદિ । ભુક્તસ્ય પરિણામહેતુરૌદર્યમ્ । આકરજં સુવર્ણાદિ ॥ ૩॥

દીપિકા

તેજસો લક્ષણમાહ । ઉષ્ણસ્પર્શવદિતિ । 'ઉષ્ણં જલમ્' ઇતિ
પ્રતીતેસ્તેજઃ સંયોગાનુવિધાયિત્વાન્નાતિવ્યાપ્તિઃ । વિષયં વિભજતે ।
ભૌમેતિ । નનુ 'સુવર્ણં પાર્થિવં' પીતત્વાદ્ગુરુત્વાત્ હરિદ્રાવત્ ઇતિ
ચેત્ ન । અત્યન્તાનલસંયોગે સતિ ઘૃતાદૌ દ્રવ્ત્વનાશદર્શનેન,
જલમધ્યસ્થઘૃતાદૌ તન્નાશાદર્શનેન ચ અસતિ પ્રતિબન્ધકે
પાર્થિવદ્રવત્વનાશાગ્નિસંયોગયોઃ કાર્યકારણભાવાવધારણાત્સુવર્ણસ્ય
અત્યન્તાનલસંયોગે સત્યનુચ્છિદ્યમાનદ્રવત્વાધિકરણત્વેન
પાર્થિવત્વાઽનુપપત્તેઃ પીતદ્રવ્યદ્રવત્વનાશપ્રતિબન્ધકતયા
દ્રવદ્રવ્યાન્તરસિદ્ધૌ નૈમિત્તિકદ્રવત્વાધિકરણતયા જલત્વાનુપપત્તેઃ
રૂપવત્તયા વાય્વાદિષ્વનન્તર્ભાવાત્તેજસત્વસિદ્ધિઃ ।
તસ્યોષ્ણસ્પર્શભાસ્વરરૂપયોરુપષ્ટમ્ભક પાર્થિવરૂપસ્પર્શાભ્યાં
પ્રતિબન્ધાદનુપલબ્ધિઃ । તસ્માત્ સુવર્ણં તૈજસમિતિ સિદ્ધમ્ ।

રૂપરહિતઃ સ્પર્શવાન્ વાયુઃ । સ દ્વિવિધઃ નિત્યઃ અનિત્યશ્ચ । નિત્યઃ
પરમાણુરૂપઃ । અનિત્યઃ કાર્યરૂપઃ । પુનઃ ત્રિવિધઃ શરીરેન્દ્રિયવિષય
ભેદાત્ । શરીરં વાયુલોકે । ઇન્દ્રિયં સ્પર્શગ્રાહકં ત્વક્ સર્વશરીરવર્તિ ।
વિષયો વૃક્ષાદિકમ્પનહેતુઃ । શરીરાન્તઃસંચારી વાયુઃ પ્રાણઃ । સ ચ
એકોઽપિ ઉપાધિભેદાત્ પ્રાણાપાનાદિસંજ્ઞાં લભતે ॥ ૪ ॥

દીપિકા

વાયું લક્ષયતિ । રૂપરહિતેતિ । આકાશાદાવતિવ્યાપ્તિવારણાય સ્પર્શવાનિતિ ।
પૃથિવ્યાદાવતિવ્યાપ્તિવારણાય રૂપરહિતેતિ । પ્રાણસ્ય કુત્રાન્તર્ભાવ ઇત્યત
આહ । શરીરેતિ । સ ચેતિ । એક એવઃ પ્રાણઃ સ્થાનભેદાત્પ્રાણાપાનાદિશબ્દૈઃ
વ્યવહ્રિયત ઇત્યર્થઃ । સ્પર્શાનુમેયો વાયુઃ । તથા હિ - યોઽયં વાયૌ
વાતિ સતિ અનુષ્ણાશીતસ્પર્શ ઉપલભ્યતે સ ક્વચિદાશ્રિતઃ
ગુણત્વાદ્રૂપવત્ । ન ચાસ્ય આશ્રયઃ પૃથિવી
ઉદ્ભૂતસ્પર્શવત્પાર્થિવસ્યોદ્ભૂતરૂપત્ત્વનિયમાત્ । ન જલ તેજસિ
અનુષ્ણાશીતસ્પર્શવત્ત્વાત્ । ન વિભુચતુષ્ટયમ્ સર્વત્રોપલબ્ધિપ્રસઙ્ગાત્ ।

ન મનઃ પરમાણુસ્પર્શસ્યાતીન્દ્રિયત્વાત્ । તસ્માદ્યઃ પ્રતીયમાનસ્પર્શાશ્રયઃ

સ વાયુઃ (એવ) । નનુ વાયુઃ પ્રત્યક્ષઃ પ્રત્યક્ષાશ્રયત્વાત્ ઘટવત્

ઇતિ ચેત્ ન । ઉદ્‌ભૂતરૂપસ્યોપાધિત્વાત્ । “યત્ર દ્રવ્યત્વે સતિ બહિરિન્દ્રિયજન્યપ્રત્યક્ષત્વં, તત્ર ઉદ્‌ભૂતરૂપવત્ત્વમ્” ઇતિ સાધ્યવ્યાપકત્વમ્ । પક્ષે સાધનાવ્યાપકત્વમ્ । ન ચૈવં તપ્તવારિસ્થતેજસોઽપિ અપ્રત્યક્ષત્વાપત્તિઃ ઇષ્ટત્વાત્ । તસ્માદ્રૂપરહિતત્વાદ્વાયુરપ્રત્યક્ષઃ । ઇદાનીં કાર્યરૂપપૃથિવ્યાદિચતુષ્ટયસ્યોત્પત્તિવિનાશક્રમઃ કથ્યતે । ઈશ્વરસ્ય ચિકીર્ષાવશાત્પરમાણુષુ ક્રિયા જાયતે । તતઃ પરમાણુદ્વયસંયોગે દ્વ્યણુકમુત્પદ્યતે । ત્રિભિરેવ દ્વ્યણુકૈસ્ત્ર્યણુકમુત્પદ્યતે । એવં ચતુરણુકાદિક્રમેણ મહતી પૃથિવીઃ, મહત્ય આપઃ, મહત્તેજઃ,

મહાન્વાયુરુત્પદ્યતે । એવમુત્પન્નસ્ય કાર્યદ્રવ્યસ્ય સંજિહીર્ષાવશાત્ ક્રિયયા પરમાણુદ્વયવિભાગે દ્વ્યણુકનાશઃ । ઇત્યેવં પૃથિવ્યાદિનાશઃ । અસમવાયિકારણાશાત્ દ્વ્યણુકનાશઃ । સમવાયિકારણાશાત્ ત્ર્યણુકનાશ ઇતિ સંપ્રદાયઃ સર્વત્રાસમવાયિકારણનાશાત્ દ્રવ્યનાશ ઇતિ નવીનાઃ । કિં પુનઃ

પરમાણુસદ્‌ભાવે પ્રમાણમ્ । ઉચ્યતે – જાલસૂર્યમરીચિસ્થં સર્વતઃ સૂક્ષ્મતમં યત્ દ્રવ્યં ઉપલભ્યતે તત્સાવયવં ચાક્ષુષદ્રવ્યત્વાદ્ઘટવત્ । ત્ર્યણુકાવયવોઽપિ સાવયવઃ મહદારમ્ભકત્વાત્કપાલવત્ । યો દ્વ્યણુકાવયવઃ સ પરમાણુઃ । સ ચ નિત્યં, તસ્યાપિ કાર્યત્વે અનવસ્થાપ્રસઙ્ગાત્ । સૃષ્ટિપ્રલયસદ્‌ભાવે “ધાતા યથાપૂર્વમકલ્પયત્ ।” ઇતિ શ્રુતિરેવ પ્રમાણમ્ । ‘સર્વકાર્યદ્રવ્યધ્વંસોઽવાન્તરપ્રલયઃ । સર્વભાવકાર્યધ્વંસો મહાપ્રલયઃ’ ઇતિ વિવેકઃ ।

શબ્દગુણકમાકાશમ્ । તચ્ચૈકં નિત્યઞ્ચ ॥ ૫॥

દીપિકા

આકાશં લક્ષયતિ । શબ્દગુણકમિતિ । નન્વાકાશમપિ પૃથિવ્યાદિવન્નાના, કિં નેત્યાહ । તચ્ચૈકમિતિ । ભેદે પ્રમાણાભાવાદિત્યર્થઃ । એકત્વાદેવ સર્વત્ર શબ્દોપલબ્ધેર્વિભુત્વમઙ્ગીકર્તવ્યમિત્યાહ વિભ્વિતિ । સર્વમૂર્તદ્રવ્યસંયોગિત્વં વિભુત્વં, મૂર્તત્વં પરિચ્છિન્નપરિમાણવત્ત્વં ક્રિયાવત્ત્વં વા। વિભુત્વાદેવ

આત્મવન્નિત્યમિત્યાહ । નિત્યં ચેતિ ।

અતીતાદિવ્યવહારહેતુઃ કાલઃ । સ ચૈકો વિભુર્નિત્યશ્ચ ॥ ૬॥

દીપિકા

કાલં લક્ષયતિ । અતીતેતિ । સર્વાધારઃ કાલઃ સર્વકાર્યનિમિત્તકારણમ્ ।

પ્રાચ્યાદિવ્યવહારહેતુર્દિક્ । સા ચૈકા વિભ્વી નિત્યા ચ ॥ ૭॥

દીપિકા

દિશો લક્ષણમાહ । પ્રાચીતિ । દિગપિ કાર્યમાત્રનિમિત્તકારણમ્ ।

જ્ઞાનાધિકરણમાત્મા । સ દ્વિવિધઃ પરમાત્મા જીવાત્મા ચ । તત્રેશ્વરઃ
સર્વજ્ઞઃ પરમાત્મૈક એવ । જીવાત્મા પ્રતિશરીરં ભિન્નો વિભુર્નિત્યશ્ચ ॥ ૮॥

દીપિકા

આત્મનો લક્ષણમાહ । જ્ઞાનેતિ । આત્માનં વિભજતે । સ દ્વિવિધ ઇતિ ।
પરમાત્મનો લક્ષણમાહ । તત્રેતિ । નિત્યજ્ઞાનાધિકરણત્વમીશ્વરત્વમ્ ।
નન્વીશ્વરસદ્ભાવે કિં પ્રમાણમ્ । ન તાવત્પ્રત્યક્ષમ્ । તદ્ધિ બાહ્યમાન્તરં
વા । નાદ્યઃ અરૂપિદ્રવ્યત્વાત્ । ન દ્વિતીયઃ આત્મસુખદુઃખાદિવ્યતિરિક્તત્વાત્ ।
નાપ્યનુમાનં લિઙ્ગાભાવાદિતિ ચેત્ ન । અઙ્કુરાદિકં સકર્તૃકં
કાર્યત્વાદ્ઘટવત્ ઇત્યનુમાનસ્યૈવ પ્રમાણત્વાત્ ।
ઉપાદાનગોચરાપરોક્ષજ્ઞાનચિકીર્ષાકૃતિમત્ત્વં કર્તૃત્વમ્ । ઉપાદાનં
સમવાયિકારણમ્ । સકલપરમાણ્વાદિસૂક્ષ્મદર્શિત્વાત્સર્વજ્ઞત્વમ્ । યઃ
સર્વજ્ઞઃ સ સર્વવિત્ ઇત્યાગમોઽપિ તત્ર પ્રમાણમ્ । જીવસ્ય લક્ષણમાહ ।
જીવ ઇતિ । સુખાદ્યાશ્રયત્વં જીવલક્ષણમ્ । નનુ મનુષ્યોઽહં બ્રાહ્મણોઽહમ્

ઇત્યાદૌ સર્વત્રાહંપ્રત્યયે શરીરસ્યૈવ વિષયત્વાચ્છરીરમેવાત્મેતિ
ચેત્ ન । શરીરસ્યાત્મત્વે કરપાદિનાશે શરીરનાશાદાત્મનોઽપિ
નાશપ્રસંગાત્ । નાપીન્દ્રિયાણામાત્મત્વમ્ , 'યોઽહં ઘટમદ્રાક્ષં
સોઽહમિદાનીં સ્પૃશામિ' ઇત્યનુસન્ધાનાભાવપ્રસઙ્ગાત્ ।
અન્યાનુભૂતેઽર્થે અન્યસ્યાનુસંધાનાયોગાત્ । તસ્માદ્દેહેઇન્દ્રિયવ્યતિરિક્તો જીવઃ

સુખદુઃખાદિવૈચિત્ર્યાત્પ્રતિશરીરં ભિન્નઃ । સ ચ ન પરમાણુઃ ।
સર્વશરીરવ્યાપિસુખાદ્યનુપલબ્ધિપ્રસઙ્ગાત્ । ન મધ્યમપરિમાણવાન્ તથા
સતિ અનિત્યત્વપ્રસઙ્ગેન કૃથાનાકૃતાભ્યાગમપ્રસઙ્ગાત્ । તસ્માન્નિત્યો
વિભુર્જીવઃ ॥

સુખાદ્યુપલબ્ધિસાધનમિન્દ્રિયં મનઃ । તચ્ચ પ્રત્યાત્મનિયતત્વાદનન્તં પરમાણુરૂપં નિત્યં ચ ॥ ૯॥

દીપિકા

મનસો લક્ષણમાહ । સુખેતિ । સ્પર્શરહિત્વે સતિ ક્રિયાવત્વં મનસો લક્ષણમ્ । તદ્વિભજતે । તચ્ચેતિ । એકૈકસ્યાત્મન એકૈકં મન ઇત્યાત્મનામનેકત્વાન્ મસોઽપ્યનેકત્વમિત્યર્થઃ । પરમાણુરૂપમિતિ । મધ્યમપરિમાણવત્ત્વે અનિત્યત્વપ્રસઙ્ગાદિત્યર્થઃ । નનુ મનો વિભુ સ્પર્શરહિત્વે સતિ દ્રવ્યત્વાદાકાશાદિવદિતિ ચેત્ ન । મનસો વિભુત્વે આત્મમનઃ સંયોગસ્યાઽસમવાયિકારણસ્યાભાવાજ્જ્ઞાનાનુત્પત્તિપ્રસઙ્ગઃ । ન ચ વિભુદ્વયસંયોગોઽસ્ત્વિતિ વાચ્યમ્ । તત્સંયોગસ્ય નિત્યત્વેન સુષુપ્ત્યભાવપ્રસઙ્ગાત, પુરીતદ્રવ્યતિરિક્તસ્થલે આત્મમનઃ સંયોગસ્ય સર્વદા વિદ્યમાનત્વાત્ । અણુત્વે તુ યદા મનઃ પુરીતત્ પ્રવિંશતિ

તદા સુષુપ્તિઃ યદા નિસ્સરતિ તદા જ્ઞાનોત્પત્તિરિત્યણુત્વસિદ્ધિઃ ।

## અથ તૃતીયોઽધ્યાય ।

ચક્ષુર્માત્રગ્રાહ્યો ગુણો રૂપમ્ । તચ્ચ શુક્લનીલપીતરક્તહરિતકપિશચિત્ર ભેદાત્સપ્તવિધમ્ । પૃથિવીજલતેજોવૃત્તિ । તત્ર પૃથિવ્યાં સપ્તવિધમ્ । અભાવસ્વરશુક્લં જલે । ભાવસ્વરશુક્લં તેજસિ ॥ ૧॥

દીપિકા

રૂપં લક્ષયતિ । ચક્ષુરિતિ । સંખ્યાદાવતિવ્યાપ્તિવારણાય માત્રપદમ્ । રૂપત્વેઽતિવ્યાપ્તિવારણાય ગુણપદમ્ । નન્વવ્યાપ્યવૃત્તિનીલાદિસમુદાય એવ ચિત્રરૂપમિતિ ચેત્ ન । રૂપસ્ય વ્યાપ્યવૃત્તિત્વનિયમાત્ । નનુ ચિત્રપટે અવયવરૂપસ્યૈવ પ્રતીતિરિતિ ચેત્ ન । રૂપરહિતત્વેન પટસ્યાપ્રત્યક્ષત્વપ્રસંગાત્ । ન ચ રૂપવત્સમવેતત્વં પ્રત્યક્ષત્વપ્રયોજકં ગૌરવાત્ । તસ્માત્પટસ્ય પ્રત્યક્ષત્વાન્યથાનુપપત્ત્યા ચિત્રરૂપસિદ્ધિઃ । રૂપસ્યાશ્રયમાહ । પૃથિવીતિ । આશ્રયં વિભજ્ય દર્શયતિ । તત્રેતિ ।

રસનગ્રાહ્યો ગુણો રસઃ । સ ચ મધુરામ્લલવણકતુકષાયતિક્તભેદાત્ ષડ્વિધઃ । પૃથિવીજલવૃત્તિઃ । તત્ર પૃથિવ્યાં ષડ્વિધઃ । જલે

મધુર એવ ॥ ૨॥

દીપિકા

રસં લક્ષયતિ । રસનેતિ । રસત્વેઽતિવ્યાપ્તિવારણાય ગુણપદમ્ ।
રસસ્યાશ્રયમાહ । પૃથિવીતિ । આશ્રયં વિભજ્ય દર્શયતિ । તત્રેતિ ।

ઘ્રાણાગ્રાહ્યો ગુણો ગન્ધઃ । સ દ્વિવિધઃ સુરભિરસુરભિશ્ચ ।
પૃથિવીમાત્રવ્રિત્તિઃ ॥ ૩॥

દીપિકા

ગન્ધં લક્ષયતિ । ઘ્રાણેતિ । ગન્ધત્વેઽતિવ્યાપ્તિવારણાય ગુણપદમ્ ।

ત્વગિન્દ્રિયમાત્રગ્રાહ્યો ગુણઃ સ્પર્શઃ । સ ચ ત્રિવિધઃ
શીતોષ્ણાનુષ્ણાશીતભેદાત્ । પૃથિવ્યપ્તેજોવાયુવૃત્તિઃ । તત્ર શીતો જલે ।
ઉષ્ણસ્તેજસિ । અનુષ્ણાશીતઃ પૃથિવીવાયવ્યોઃ ॥ ૪॥

દીપિકા

સ્પર્શં લક્ષયતિ । ત્વગિતિ । સ્પર્શત્વેઽતિવ્યાપ્તિવારણાય ગુણપદમ્ ।
સંયોગાદાવતિવ્યાપ્તિવારણાય માત્રપદમ્ ।

રૂપાદિચતુષ્ટયં પૃથિવ્યાં પાકજમનિત્યં ચ । અન્યત્ર અપાકજં
નિત્યમનિત્યમ્ ચ । નિત્યગતં નિત્યમ્ અનિત્યગતમનિત્યમ્ ॥ ૫॥

દીપિકા

પાકજમિતિ । પાકસ્તેજઃ સંયોગઃ । તેન પૂર્વરૂપં નશ્યતિ
રૂપાન્તરમુત્પદ્યત ઇત્યર્થઃ । તત્ર પરમાણુષ્વેવ પાકો ન દ્વ્યણુકાદૌ ।
આમનિક્ષિપ્તે ઘટે પરમાણુષુ રૂપાન્તરોત્પત્તૌ શ્યામઘટનાશે
પુનર્દ્વ્યણુકાદિક્રમેણ રક્તઘટોત્પત્તિઃ । તત્ર પરમાણવઃ
સમવાયિકારણમ્ । તેજઃ સંયોગોઽસમવાયિકારણમ્ । અદૃષ્ટાદિકં
નિમિત્તકારણમ્ । દ્વ્યણુકાદિરૂપે કારણરૂપસમવાયિકારણમિતિ પીલુપાકવાદિનો
વૈશેષિકાઃ । પૂર્વઘટસ્ય નાશં વિનૈવ્ અવયવિનિ અવયવેષુ ચ
પરમાણુપર્યન્તેષુ યુગપદ્રૂપાન્તરોત્પત્તિરિતિ પિઠરપાકવાદિનો નૈયાયિકાઃ ।
અત એવ પાર્થિવપરમાણુરૂપાદિકમનિત્યમનિત્યર્થઃ । અન્યત્ર
જલાદાવિત્યર્થઃ । નિત્યગતમિતિ । પરમાણુગતમિત્યર્થઃ । અનિત્યગતમિતિ ।
દ્વ્યણુકાદિગતભિત્યર્થઃ । રૂપાદિચતુષ્ટયમ્ ઉદ્ભૂતં પ્રત્યક્ષમ્ ।
અનુદ્ભૂતમપ્રત્યક્ષમ્ । ઉદ્ભૂતત્વં પ્રત્યક્ષત્વપ્રયોજકો ધર્મઃ ।
તદભાવોઽનુદ્ભૂતત્વમ્ ।

એકત્વાદિવ્યવહારહેતુઃ સંખ્યા । સા નવદ્રવ્યવૃત્તિઃ
એકત્વાદિપરાર્ધપર્યન્તા । એકત્વં નિત્યમનિત્યં ચ । નિત્યગતં નિત્યમ્ ।
અનિત્યગતમનિત્યમ્ । દ્વિત્વાદિકં તુ સર્વત્રાઽનિત્યમેવ ॥ ૬॥

દીપિકા

સંખ્યા લક્ષયતિ । એકેતિ ।

માનવ્યવહારાસાધારણકારણં પરિમાણમ્ । નવદ્રવ્યવૃત્તિઃ । તચ્ચતુર્વિધમ્ ।
અણુ મહત્ દીર્ઘં હૃઅસ્વં ચેતિ ॥ ૭॥

દીપિકા

પરિમાણં લક્ષયતિ । માનેતિ । પરિમાણં વિભજતે । તચ્ચેતિ । ભાવપ્રધાનો
નિર્દેશઃ । અણુત્વં,મહત્ત્વં,દીર્ઘત્વં,હ્રસ્વત્વં ચેત્યર્થઃ ।

પૃથગ્વ્યવહારાસાધારણકારણં પૃથક્ત્વમ્ । સર્વદ્રવ્યવૃત્તિઃ ॥૮॥

દીપિકા

સંયુક્તવ્યવહારહેતુઃ સંયોગઃ । સર્વદ્રવ્યવૃત્તિઃ ॥ ૯॥

દીપિકા

સંયોગં લક્ષયતિ । સંયુક્તેતિ । ઇમૌ સંયુક્તૌ ઇતિ
વ્યવહારહેતુરિત્યર્થઃ । સંખ્યાદિલક્ષણે સર્વત્ર
દિક્કાલાદાવતિવ્યપ્તિવારણાય અસાધારાણેતિ વિશેષણીયમ્ । સંયોગો દ્વિવિધઃ
કર્મજઃ સંયોગજશ્ચેતિ । આદ્યો હસ્તક્રિયયા હસ્તપુસ્તકસંયોગઃ । દ્વિતીયો
હસ્તપુસ્તકસંયોગાત્કાયપુસ્તકસંયોગઃ । અવ્યાપ્યવૃત્તિઃ સંયોગઃ ।
સ્વાત્યન્તાભાવસમાનાધિકરણત્વમવ્યાપ્યવૃત્તિત્વમ્ ।

સંયોગનાશકો ગુણો વિભાગઃ । સર્વદ્રવ્યવૃત્તિઃ ॥ ૧૦॥

દીપિકા

વિભાગં લક્ષયતિ । સંયોગેતિ । કાલાદાવતિવ્યાપ્તિવારણાય ગુણ ઇતિ ।
રૂપાદાવતિવ્યાપ્તિવારણાય સંયોગનાશક ઇતિ । વિભાગોઽપિ દ્વિવિધઃ કર્મજો
વિભાગજશ્ચેતિ । આદ્યો હસ્તપુસ્તકવિભાગઃ । દ્વિતીયો
હસ્તપુસ્તકવિભાગાત્કાયપુસ્તકવિભાગઃ ।

પરાપરવ્યવહારાસાધારણકારણે પરત્વાપરત્વે । પૃથિવ્યાદિચતુષ્ટય
મનોવૃત્તિની । તે દ્વિવિધે દિક્કૃતે કાલકૃતે ચ । દૂરસ્થે દિક્કૃતં

પરત્વમ્ । સમીપસ્થે દિક્કૃતમપરત્વમ્ । જ્યેષ્ઠે કાલકૃતં પરત્વમ્ ।
કનિષ્ઠે કાલકૃતમપરત્વમ્ ॥ ૧૧॥

દીપિકા
પરત્વાપરત્વયોર્લક્ષણમાહ । પરાપરેતિ । પરવ્યવહારાસાધારણકારણં પરત્વમ્ । અપરવ્યવહારાસાધારણકારણમપરત્વમ્ ઇત્યર્થઃ । તે વિભજતે । તે દ્વિવિધે ઇતિ । દિક્કૃતયોરૂદાહરણમાહ । દૂરસ્થ ઇતિ । કાલકૃતે ઉદાહરતિ । જ્યેષ્ઠ ઇતિ ।

આદ્યપતનાસમવાયિકારણં ગુરૂત્વમ્ । પૃથિવીજલવૃત્તિ ॥ ૧૨॥

દીપિકા
ગુરૂત્વં લક્ષયતિ । આદ્યેતિ । દ્વિતીયાદિપતનસ્ય વેગાસમવાયિકારણત્વદ્વેગેઽતિવ્યાપ્તિવારણાય આદ્યેતિ ।

આદ્યસ્યન્દનાસમવાયિકારણં દ્રવત્વમ્ । પૃથિવ્યપ્તેજોવૃત્તિ । તદ્દ્વિવિધં સાંસિદ્ધિકં નૈમિત્તિકં ચ।સાંસિદ્ધિકં જલે । નૈમિત્તિકં પૃથિવીતેજસોઃ । પૃથિવ્યાં ઘૃતાદાવગ્નિ સંયોગજં દ્રવત્વમ્ । તેજસિ સુવર્ણાદૌ ॥ ૧૩ ॥

દીપિકા
દ્રવત્વં લક્ષયતિ । આદ્યેતિ । સ્યન્દનં પ્રસ્રવણમ્ । તેજઃસંયોગજં નૈમિત્તિકમ્ । તદ્ભિન્નં સાંસિદ્ધિકમ્ । પૃથિવ્યાં નૈમિત્તિકમુદાહરતિ । ઘૃતાદાવિતિ । તેજસિ તદાહ । સુવર્ણાદાવિતિ ।

ચૂર્ણાદિપિણ્ડીભાવહેતુર્ગુણઃ સ્નેહઃ । જલમાત્રવૃત્તિઃ ॥ ૧૪॥

દીપિકા
સ્નેહં લક્ષયતિ । ચૂર્ણેતિ । કાલાદાવતિવ્યાપ્તિવારણાય ગુણપદમ્ । રૂપાદાવતિવ્યાપ્તિવારણાય પિણ્ડીભાવેતિ ।

શ્રોત્રગ્રાહ્યો ગુણઃ શબ્દઃ, આકાશમાત્રવૃત્તિઃ । સ દ્વિવિધઃ, ધ્વન્યાત્મકઃ વર્ણાત્મકશ્ચ । તત્ર ધ્વન્યાત્મકઃ ભેર્યાદૌ । વર્ણાત્મકઃ સંસ્કૃતભાષાદિરૂપઃ ॥ ૧૫॥

શબ્દં લક્ષયતિ । શ્રોત્રેતિ । શબ્દત્વેઽતિવ્યાપ્તિવારણાય ગુણપદમ્ । રૂપાદાવતિવ્યાપ્તિવારણાય શ્રોત્રેતિ । શબ્દાસ્ત્રિવિધઃ સંયોગજઃ, વિભાગજઃ, શબ્દજશ્ચેતિ । તત્ર આદ્યો ભેરીદણ્ડસંયોગજન્યઃ ।

દ્વિતીયો વંશે પાટ્યમાને દળદ્વયવિભાગજન્યશ્ચટાશબ્દઃ ।
ભેર્યાદિદેશમારભ્ય શ્રોત્રદેશપર્યન્તં દ્વિતીયાદિશબ્દાઃ શબ્દજાઃ ।

સર્વવ્યવહારહેતુર્ગુણો બુદ્ધિર્જ્ઞાનમ્ । સા દ્વિવિધા સ્મૃતિરનુભવશ્ચ ॥ ૧૬॥

દીપિકા

બુદ્ધેર્લક્ષણમાહ । સર્વવ્યવહારેતિ । કાલાદાવતિવ્યાપ્તિવારણાય ગુણ ઇતિ ।
રૂપાદાવતિવ્યાપ્તિવારણાય સર્વવ્યવહાર ઇતિ । જાનામીત્યનુવ્યવસાયગમ્યં
જ્ઞાનમેવ લક્ષણમિતિ ભાવઃ । બુદ્ધિં વિભજતે । સેતિ ।

સંસ્કારમાત્રજન્યં જ્ઞાનં સ્મૃતિઃ ॥ ૧૭॥

દીપિકા

સ્મૃતેર્લક્ષણમાઃ । સંસ્કારેતિ । ભાવનાખ્યઃ સંસ્કારઃ ।
સંસ્કારધ્વંસેઽતિવ્યાપ્તિવારણાય જ્ઞાનમિતિ ।
ઘટાદિપ્રત્યક્ષેઽતિવ્યાપ્તિવારણાય સંસ્કારજન્યમિતિ । પ્રત્યભિજ્ઞાયામ્
અતિવ્યાપ્તિવારણાય માત્રપદમ્ ।

તદ્ભિન્નં જ્ઞાનમનુભવઃ । સ દ્વિવિધઃ, યથાર્થોઽયથાર્થશ્ચ ॥ ૧૮॥

દીપિકા

અનુભવં લક્ષયતિ । તદ્ભિન્નમિતિ । સ્મૃતિભિન્નં જ્ઞાનમનુભવ
ઇત્યર્થઃ । અનુભવં વિભજતે । સ દ્વિવિધ ઇતિ ।

તદ્વતિ તત્પ્રકારકોઽનુભવો યથાર્થઃ । યથા રજતે ઇદં રજતમિતિ
જ્ઞાનમ્ । સૈવ પ્રમેત્યુચ્યતે ॥ ૧૯॥

દીપિકા

યથાર્થાનુભવસ્ય લક્ષણમાહ । તદ્વતીતિ । નનુ ઘટે ઘટત્વમ્ ઇતિ
પ્રમાયામવ્યાપ્તિઃ, ઘટત્વે ઘટાભાવાદિતિ ચેત્ ન, યત્ર
યત્સંબન્ધોઽસ્તિ તત્ર તત્સંબન્ધાનુભવઃ ઇત્યર્થાદ્ઘટત્વે
ઘટસંબન્ધોઽસ્તીતિ નાવ્યાપ્તિઃ । સૈવેતિ । યથાર્થાનુભવ એવ શાસ્ત્રે
પ્રમેત્યુચ્યત ઇત્યર્થઃ ।

તદભાવવતિ તત્પ્રકારકોઽનુભવોઽયથાર્થઃ । યથા
શુક્તાવિદંરજતમિતિ જ્ઞાનમ્ । સૈવ અપ્રમા ઇત્યુચ્યતે ॥ ૨૦॥

દીપિકા

અયથાર્થાનુભવં લક્ષયતિ । તદભાવવતીતિ । નન્વિદં સંયોગીતિ

પ્રમાયામતિવ્યાપ્તિરિતિ ચેત્ ન । યદવચ્છેદેન
યત્સંબન્ધાભાવસ્તદવચ્છેદેન તત્સંબન્ધજ્ઞાનસ્ય વિવિક્ષિતત્વાત્ ।
સંયોગાભાવાવચ્છેદેન સંયોગજ્ઞાનસ્ય ભ્રમત્વાત્સંયોગાવચ્છેદેન
સંયોગસંબન્ધસ્ય સત્ત્વાન્નાતિવ્યાપ્તિઃ ।

યથાર્થાનુભવઃ ચતુર્વિધઃ પ્રત્યક્ષાનુમિત્યુપમિતિશબ્દાભેદાત્ ॥ ૨૧॥

દીપિકા
યથાર્થાનુભવં વિભજતે । યથાર્થેતિ ।

તત્ કરણમપિ ચતુર્વિધં પ્રત્યક્ષાનુમાનોપશબ્દ ભેદાત્ ॥ ૨૨॥

દીપિકા
પ્રસઙ્ગાત્પ્રમાકરણં વિભજતે । તત્કરણમપીતિ । પ્રમાકરણમિત્યર્થઃ ।
પ્રમાકરણં પ્રમાણમિતિ પ્રમાણસામાન્યલક્ષણમ્ ।

અસાધરણં કારણં કરણમ્ ॥ ૨૩॥

દીપિકા
કરણલક્ષણમાહ । અસાધારણેતિ । દિક્કાલાદાવતિવ્યાપ્તિવારણાય અસાધારણેતિ ।

કાર્યનિયતપૂર્વવૃત્તિ કારણમ્ ॥ ૨૪॥

દીપિકા
કારણલક્ષણમાહ । કાર્યેતિ । પૂર્વવૃત્તિ કારણમિત્યુક્તે
રાસભાદાવતિવ્યાપ્તિઃ સ્યાદતો નિયતેતિ । તાવન્માત્રે કૃતે
કાર્યેऽતિવ્યાપ્તિરતઃ પૂર્વવૃત્તીતિ । નનુ તન્તુરૂપમપિ પટં પ્રતિ કારણં
સ્યાદતિ ચેત્ ન, અનન્યથાસિદ્ધત્વે સતીતિ વિશેષણાત્ ।
અનન્યથાસિદ્ધત્વમન્યથાસિદ્ધિરહિતત્વમ્ । અન્યથાસિદ્ધિઃ ત્રિવિધા -
યેન સહૈવ યસ્ય યં પ્રતિ પૂર્વવૃત્તિત્વમવગમ્યતે તં પ્રતિ તેન
તદન્યથાસિદ્ધમ્ । યથા તન્તુનાં તન્તુરૂપં તન્તુત્વં ચ પટં પ્રતિ । તં
પ્રતિ તદન્યથાસિદ્ધમ્ । યથા શબ્દં પ્રતિ પૂર્વવૃતિત્ત્વે જ્ઞાત એવ
પટં પ્રત્યાકાશસ્ય । અન્યત્ર ક્લૃપ્તનિયતપૂર્વવતિર્ન એવ કાર્યસંભવે
તત્સહભૂતમન્યથાસિદ્ધમ્ । યથા પાકજસ્થલે ગન્ધં પ્રતિ
રૂપપ્રાગભાવસ્ય । એવઞ્ચ અનન્યથાસિદ્ધનિયતપૂર્વવૃત્તિત્વં
કારણત્વમ્ ।

કાર્યં પ્રાગભાવપ્રતિયોગિ ॥ ૨૫॥

દીપિકા

કાર્યલક્ષણમાહ । કાર્યમિતિ ।

કારણં ત્રિવિધમ્ - સમવાય્યસમવાયિનિમિત્તભેદાત્ ॥ ૨૬॥

યત્ સમવેતં કાર્યં ઉત્પદ્યતે તત્ સમવાયિકારણમ્ ।
યથા તંતવઃ પટસ્ય, પટશ્ચ સ્વગતરૂપાદેઃ ॥ ૨૭॥

દીપિકા

કારણં વિભજતે । કારણમિતિ । સમવાયિકારણસ્ય લક્ષણમાહ ——
યત્સમવેતમિતિ । યસ્મિન્ સમવેતમિત્યર્થઃ । અસમવાયિકારણં લક્ષયતિ
—- કાર્યણેતિ । કાર્યેણેત્યેતદુદાહરતિ —– તન્તુસંયોગ ઇતિ ।

કાર્યેણ કારણેન વા સહ એકસ્મિન્નર્થે સમવેતત્વે સતિ યત્કારણં
તદસમવાયિકારણમ્ ।
યથા તંતુસંયોગઃ પટસ્ય, તન્તુરૂપં પટરૂપસ્ય ॥ ૨૮॥

દીપિકા

કાર્યેણ પટેન સહ એકસ્મિંસ્તન્તૌ સમવેતત્વાત્તન્તુસંયોગઃ
પટસ્યાસમવાયિકારણમિયર્થઃ । કારણેનેત્યેતદુદાહરતિ —-
તન્તુરૂપમિતિ । કારણેન પટેન સહ એકસ્મિંસ્તન્તૌ સમવેતત્વાત્ ।

તદુભયભિન્નં કારણં નિમિત્તકારણમ્ ।
યથા તુરીવેમાદિકં પટસ્ય ॥ ૨૯॥

દીપિકા

તન્તુરૂપં પટરૂપસ્યાસમવાયિકારણમિત્યર્થઃ । નિમિત્તકારણં લક્ષયતિ
— તદુભયેતિ । સમવાય્યસમવાયિભિન્નકારણં નિમિત્તકારણમિત્યર્થઃ ।

તદેતત્ત્રિવિધકારણમધ્યે યદસાધારણં કારણં તદેવ કરણમ્ ॥ ૩૦॥

દીપિકા

કરણલક્ષણમુપસંહરતિ —- તદેતદિતિ ।

## અથ ચતુર્થોઽધ્યાય ।

તત્ર પ્રત્યક્ષજ્ઞાનકરણં પ્રત્યક્ષમ્ ॥ ૩૧॥

દીપિકા

પ્રત્યક્ષલક્ષણમાહ —— તત્રેતિ । પ્રમાણચતુષ્ટયમધ્યે
ઇત્યર્થઃ ।

ઇન્દ્રિયાર્થસન્નિકર્ષજન્યં જ્ઞાનં પ્રત્યક્ષમ્ । તદ્દ્વિવિધં નિર્વિકલ્પકં
સવિકલ્પકં ચેતિ । તત્ર નિષ્પ્રકારકં જ્ઞાનં નિર્વિકલ્પકં યથેદં
કિઞ્ચિત્ । સપ્રકારકં જ્ઞાનં સવિકલ્પકં યથા ડિત્થોઽયં,
બ્રાહ્મણોઽયં, શ્યામોઽયં, પાચકોઽયમિતિ ॥ ૩૨॥

દીપિકા

પ્રત્યક્ષજ્ઞાનસ્ય લક્ષણમાહ ——- ઇન્દ્રિયેતિ । ઇન્દ્યિયં
ચક્ષુરાદિકમ્, અર્થો ઘટાદિઃ, તયોઃ સંનિકર્ષઃ સંયોગાદિઃ,
તજ્જન્યં જ્ઞાનમિત્યર્થઃ । તદ્વિભજતે તદ્દ્વિવિધમિતિ । નિર્વિકલ્પસ્ય
લક્ષણમાહ ——- નિષ્પ્રકારકમિતિ ।
વિશેષણવિશેષ્યસંબન્ધાનવગાહિ જ્ઞાનમિત્યર્થઃ । નનુ નિર્વિકલ્પકે
કિં પ્રમાણમિતિ ચેત્ ન, ગૌરિતિ વિશિષ્ટજ્ઞાનં
વિશેષણજ્ઞાનજન્યં, વિશિષ્ટજ્ઞાનત્વાત્, દણ્ડીતિ જ્ઞાનવત્
ઇત્યનુમાનસ્ય પ્રમાણત્વાત્ । વિશેષણજ્ઞાનસ્યાપિ
સવિકલ્પકત્વેઽનવસ્થાપ્રસઙ્ગાન્નિર્વિકલ્પકસિદ્ધિઃ । સવિકલ્પકં
લક્ષયતિ । સપ્રકારકમિતિ । નામજાત્યાદિવિશેષ્યવિશેષણસંબન્ધાવગાહિ
જ્ઞાનમિત્યર્થઃ । સવિકલ્પકમુદાહરતિ । યથેતિ ।

પ્રત્યક્ષજ્ઞાનહેતુરિન્દ્રિયાર્થસંનિકર્ષઃ ષડ્વિધઃ । સન્યોગઃ,
સંયુક્તસમવાયઃ, સંયુક્તસમવેતસમવાયઃ, સમવાયઃ,
સમવેતસમવાયઃ, વિશેષણવિશેષ્યભાવશ્ચેતિ ॥ ૩૩॥

દીપિકા

ઇન્દ્રિયાર્થસંનિકર્ષં વિભજતે । પ્રત્યક્ષેતિ ।

ચક્ષુષા ઘટપ્રત્યક્ષજનને સંયોગઃ સન્નિકર્ષઃ ॥ ૩૪॥

દીપિકા

સંયોગસંનિકર્ષમુદાહરતિ । ચક્ષુષેતિ । દ્રવ્યપ્રત્યક્ષે સર્વત્ર
સંયોગઃ સંનિકર્ષઃ । આત્મા મનસા સંયુજ્યતે, મન ઇન્દ્રિયેણ,
ઇન્દ્રિયમર્થેન, તતઃ પ્રત્યક્ષજ્ઞાનમુત્પદ્યતે ઇત્યર્થઃ ।

ઘટરૂપપ્રત્યક્ષજનને સંયુક્ત સમવાયઃ સંનિકર્ષઃ ।
ચક્ષુઃ સંયુક્તે ઘટે રૂપસ્ય સમવાયાત્ ॥ ૩૫॥

દીપિકા

સંયુક્તસમવાયમુદાહરતિ । ઘટરૂપેતિ । તત્ર યુક્તિમાહ । ચક્ષુઃસંયુક્ત ઇતિ ।

રૂપત્વસામાન્યપ્રત્યક્ષે સંયુક્તસમવેતસમવાયઃ સન્નિકર્ષઃ ।
ચક્ષુઃ સંયુક્તે ઘટે રૂપં સમવેતં, તત્ર રૂપત્વસ્ય સમવાયાત્ ॥ ૩૬॥

દીપિકા

સંયુક્તસમવેતસમવાયમુદાહરતિ । રૂપત્વેતિ ।

શ્રોત્રેણ શબ્દસાક્ષાત્કારે સમવાયઃ સન્નિકર્ષઃ કર્ણવિવરવર્ત્યાકાશસ્ય
શ્રોત્રત્વાત્ શબ્દસ્યાકાશગુણત્વાત્ ગુણગુણિનોશ્ચ સમવાયાત્ ॥ ૩૭॥

દીપિકા

સમવાયમુદાહરતિ । શ્રોત્રેણેતિ । તદુપપાદયતિ । કર્ણેતિ । નનુ દૂરસ્થશબ્દસ્ય કથં શ્રોત્રસમ્બન્ધ ઇતિ ચેત્ ન, વીચીતરઙ્ગન્યાયેન વા શબ્દાન્તરોત્પત્તિક્રમેણ શ્રોત્રદેશે જાતસ્ય શ્રોત્રેણ સંબન્ધાત્પ્રત્યક્ષસંભવઃ ।

શબ્દત્વસાક્ષાત્કારે સમવેતસમવાયઃ સન્નિકર્ષઃ શ્રોત્રસમવેતે શબ્દે
શબત્વસ્ય સમવાયાત્ ॥ ૩૮॥

દીપિકા

સમવેતસમવાયમુદાહરતિ । શબ્દત્વેતિ ।

અભાવપ્રત્યક્ષે વિશેષણવિશેષ્યભાવઃ સન્નિકર્ષઃ,
ઘટાભાવવદ્ભૂતલમિત્યત્ર ચક્ષુઃ સંયુક્તે ભૂતલે ઘટાભાવસ્ય
વિશેષણત્વાત્ ॥ ૩૯॥

દીપિકા

વિશેષણવિશેષ્યાભાવમુદાહરતિ । અભાવેતિ । તદુપપાદયતિ । ઘટાભાવવદિતિ । ભૂતલે ઘટો નાસ્તીત્યત્ર અભાવસ્ય વિશેષ્યત્વં દ્રષ્ટવ્યમ્ । એતેન અનુપલબ્ધેઃ પ્રમાણાન્તરત્વં નિરસ્તમ્ । યદ્યત્ર ઘટોऽભવિષ્યત્તર્હિ ભૂતલમિવાદ્રક્ષ્યત, દર્શનાભાવાન્નાસ્તીતિ તર્કિતપ્રતિયોગિસત્વવિરોધ્યનુપલબ્ધિસહકૃતેન્દ્રિયેણૈવ અભાવજ્ઞાનોત્પત્તૌ અનુપલબ્ધેઃ પ્રમાણાન્તરત્વાસંભવાત્ ।

અધિકરણજ્ઞાનાર્થમપેક્ષણીયેન્દ્રિયસ્યૈવ કરણત્વોપપત્તાવનુપલબ્ધેઃ કરણત્વયોગાત્ । વિશેષણવિશેષ્યભાવો વિશેષણવિશેષ્યસ્વરૂપમેવ, નાતિરિક્તઃ સંબન્ધઃ । પ્રત્યક્ષજ્ઞાનમુપસંહરસ્તસ્ય કરણમાહ । એવમિતિ ।

એવં સન્નિકર્ષષટ્કજન્યં જ્ઞાનં પ્રત્યક્ષં, તત્કરણમિન્દ્રિયમ્, તસ્માદિન્દ્રિયં પ્રત્યક્ષપ્રમાણમિતિ સિદ્ધમ્ ॥ ૪૦॥

દીપિકા

અસાધારણકારણત્વાદિન્દ્રિયં પ્રત્યક્ષજ્ઞાનકરણમિત્યર્થઃ । પ્રત્યક્ષપ્રમાણમુપસંહરતિ ।

## અથ પંચમોઽધ્યાય ।

અનુમિતિકરણમનુમાનમ્ ॥ ૧॥

દીપિકા

અનુમાનં લક્ષયતિ —— અનુમિતિકરણમિતિ ।

પરામર્શજન્યં જ્ઞાનમનુમિતિઃ ॥ ૨॥

દીપિકા

અનુમિતિં લક્ષયતિ — પરામર્શેતિ । નનુ સંશયોત્તરપ્રત્યક્ષેઽતિવ્યાપ્તિઃ સ્થાણુપુરૂષસંશયાનન્તરં પુરૂષત્વવ્યાપ્યકરાદિમાનયમ્ ઇતિ પરામર્શે સતિ પુરૂષ એવ ઇતિ પ્રત્યક્ષજનનાત્ । ન ચ તત્રાનુમિતિરેવેતિ વાચ્યમ્ । પુરૂષં સાક્ષાત્કરોમિ ઇત્યનુવ્યવસાયવિરોધાદિતિ ચેત્ ન, પક્ષતાસહકૃતપરામર્શજન્યત્વસ્ય વિવિક્ષિત્વાત્ । સિષાધયિષાવિરહવિશિષ્ટસિદ્ધ્યભાવઃ પક્ષતા । સાધ્યસિદ્ધિરનુમિતિપ્રતિબન્ધિકા । સિદ્ધિસત્ત્વેઽપિ અનુમિયુયામ્ ઇતીચ્છાયામનુમિતિદર્શનાત્ । સિષાધયિષોત્તેજિકા । તત્શ્ચોત્તેજકાભાવવિશિષ્ટમણ્યભાવસ્ય દાહકારણત્વવત્સિષાધયિષાવિરહવિશિષ્ટસિદ્ધ્યભાવસ્યાપ્યનુમિતિકારણત્વમ્ ।

વ્યાપ્તિવિશિષ્ટપક્ષધર્મતાજ્ઞાનં પરામર્શઃ । યથા વહ્નિવ્યાપ્યધૂમવાનયં પર્વત ઇતિ જ્ઞાનં પરામર્શઃ । તજ્જન્યં પર્વતો

વહ્નિમાનિતિ જ્ઞાનમનુમિતિઃ ॥ ૩॥

દીપિકા

પરામર્શં લક્ષયતિ —– વ્યાપ્તીતિ । વ્યાપ્તિવિષયકં યત્પક્ષધર્મતાજ્ઞાનં સ પરામર્શ ઇત્યર્થઃ । પરામર્શમભિનીય દર્શયતિ —— યથેતિ । અનુમિતિમભિનીય દર્શયતિ ——- તજ્જન્યમિતિ । પરામર્શજન્યમિત્યર્થઃ । વ્યાપ્તિલક્ષણમાહ —- યત્રેતિ ।

યત્ર યત્ર ધૂમસ્તત્ર તત્રાગ્નિરિતિ સાહચર્યનિયમો વ્યાપ્તિઃ ॥ ૪॥

દીપિકા

યત્ર ધૂમસ્તત્રાગ્નિઃ ઇતિ વ્યાપ્તેરભિનયઃ । સાહચર્યનિયમઃ ઇતિ લક્ષણમ્ । સાહચર્યં સામાનાધિકરણ્યં, તસ્ય નિયમઃ । હેતુસમાનાધિકરણાત્યન્તાભાવાપ્રતિયોગિસાધ્યસામાનાધિકરણ્યં વ્યાપાપ્તિરિત્યર્થઃ ।

વ્યાપ્યસ્ય પર્વતાદિવૃત્તિત્વં પક્ષધર્મતા ॥ ૫॥

દીપિકા

પક્ષધર્મતારૂપમાહ ——– વ્યાપ્યસ્યેતિ ।

અનુમાનં દ્વિવિધં – સ્વાર્થં પરાર્થં ચ ॥ ૬॥

તત્ર સ્વાર્થં સ્વાનુમિતિહેતુઃ, તથાહિ, સ્વયમેવ ભૂયોદર્શનેન યત્ર યત્ર ધૂમસ્તત્ર તત્રાગ્નિરિતિ મહાનસાદૌ વ્યાપ્તિં ગૃહીત્વા પર્વતસમીપં ગતઃ, તદ્ગતે ચાગ્નૌ સન્દિહાનઃ પર્વતે ધૂમં પશ્યન્ વ્યાપ્તિં સ્મરતિ યત્ર યત્ર ધૂમસ્તત્ર તત્રાગ્નિઃ ઇતિ । તદન્તરં વહ્નિવ્યાપ્યધૂમવાનયં પર્વત ઇતિ જ્ઞાનમુત્પદ્યતે, અયમેવ લિઙ્ગપરામર્શ ઇત્યુચ્યતે । તસ્માત્ પર્વતો વહ્નિમાનિતિ જ્ઞાનમનુમિતિઃ ઉત્પદ્યતે । તદેતત્ સ્વાર્થાનુમાનમ્ ॥ ૭॥

દીપિકા

અનુમાનં વિભજતે ——– અનુમાનમિતિ । સ્વાર્થાનુમાનં દર્શયતિ સ્વયમેવેતિ । નનુ પાર્થિવત્વલોહલેખ્યત્વાદૌ શતશઃ સહચારદર્શનેઽપિ વજ્રમણૌ વ્યભિચારોપલબ્ધેર્ભૂયોદર્શનેન કથં વ્યાપ્તિગ્રહ ઇતિ ચેત્ ન । વ્યભિચારજ્ઞાનવિરહસહકૃતસહચારજ્ઞાનસ્ય

વ્યાપ્તિગ્રાહકત્વાત્ । વ્યભિચારજ્ઞાનં નિશ્ચયઃ શઙ્કા ચ । તદ્વિરહઃ ક્વચિત્તર્કાત્, ક્વચિત્સ્વતઃ સિદ્ધ એવ । ધૂમાગ્ન્યોર્વ્યાપ્તિગ્રહે કાર્યકારણભાવભઙ્ગપ્રસઙ્ગલક્ષણસ્તર્કો વ્યભિચારશઙ્કાનિવર્તકઃ । નનુ સકલવહ્નિધૂમયોરસન્નિકર્ષાત્કથં વ્યાપ્તિગ્રહ ઇતિ ચેત્ ન । વહ્નિત્વધૂમત્વરૂપસામાન્યપ્રત્યાસત્ત્યાસકલવહ્નિધૂમજ્ઞાનસંભવાત્ । તસ્માદિતિ । લિઙ્ગપરામર્શાદિત્યર્થઃ ।

યત્તુ સ્વયં ધૂમાદગ્નિમનુમાય પરંપ્રતિબોધયિતું પઞ્ચાવયવ વાક્યં પ્રયુજ્યતે તત્ પરાર્થાનુમાનમ્ । યથા પર્વતો વહ્નિમાન્, ધૂમત્વાત્ , યો યો ધૂમવાન્ સ વહ્નિમાન્ યથા મહાનસઃ, તથા ચાયં, તસ્માત્તથેતિ । અનેન પ્રતિપાદિતાત્ લિઙ્ગાત્ પરોઽપ્યગ્નિં પ્રતિપદ્યતે ।

દીપિકા

પરાર્થાનુમાનમાહ ———- યત્ત્વિતિ । યચ્છબ્દસ્ય ‘ તત્પરાર્થાનુમાનમ્” ઇતિ તચ્છબ્દેનાન્વયઃ । પઞ્ચાવયવવાક્યમુદાહરતિ —– યથેતિ ।

પ્રતિજ્ઞા - હેતુ - ઉદાહરણ - ઉપનય - નિગમનાનિ પઞ્ચાવયવાઃ । પર્વતો વહ્નિમાનિતિ પ્રતિજ્ઞા । ધૂમવત્વાત્ ઇતિ હેતુઃ । યો યો ધૂમવાન્ સ વહ્નિમાન્ યથા મહાનસ ઇત્યુદાહરણમ્ । તથા ચ અયમિતિ ઉપનયઃ । તસ્માત્તથેતિ નિગમનમ્ ॥ ૯॥

દીપિકા

અવયવસ્વરૂપમાહ ——— પ્રતિજ્ઞેતિ ॥ ઉદાહૃત્વાક્યે પ્રતિજ્ઞાદિવિભાગમાહ ——- પર્વતો વહ્નિમાનિતિ ॥ સાધ્યવત્તયા પક્ષવચનં પ્રતિજ્ઞા । પઞ્ચમ્યન્તં લિઙ્ગપ્રતિપાદકં હેતુઃ । વ્યાપ્તિપ્રતિપાદકં ઉદાહરણમ્ । વ્યાપ્તિવિશિષ્ટલિઙ્ગપ્રતિપાદકં વચનમુપનયઃ । હેતુસાધ્યવત્તયા પક્ષપ્રતિપાદકં વચનં નિગમનમ્ । અબાધિતત્વાદિકં નિગમનપ્રયોજનમ્ ।

સ્વાર્થાનુમિતિપરાર્થાનુમિત્યોઃ લિઙ્ગપરામર્શ એવ કરણમ્ । તસ્માત્ લિઙ્ગપરામર્શોઽનુમાનમ્ ॥ ૧૦॥

દીપિકા

અનુમિતિકરણમાહ — સ્વાર્થેતિ । નનુ વ્યાપ્તિસ્મૃતિપક્ષધર્મતાજ્ઞાનાભ્યામેવ અનુમિતિસંભવે

વિશિષ્ટપરામર્શઃ કિમર્થમઙ્ગીકર્તવ્ય ઇતિ ચેત્ ન, ‘
વહ્નિવ્યાપ્યવાનયમ્” ઇતિ શાબ્દપરામર્શસ્થલે
પરામર્શસ્યાવશ્યકતયા લાઘવેન સર્વત્ર પરામર્શસ્યૈવ કારણત્વાત્ ।
લિઙ્ગં ન કરણમ્, અતીતાદૌ વ્યભિચારાત્ । “વ્યાપારવત્વકારણં
કરણમ્” ઇતિ મતે પરામર્શદ્વારા વ્યાપ્તિજ્ઞાનં કરણમ્ । તજ્જન્યત્વે
સતિ તજ્જન્યજનકો વ્યાપારઃ । અનુમાનમુપસંહરતિ - તસ્માદિતિ ।

લિઙ્ગં ત્રિવિધમ્ । અન્વયવ્યતિરેકિ, કેવલાન્વયિ, કેવલવ્યતિરેકિ
ચેતિ । અન્વયેન વ્યતિરેકેણ ચ વ્યાપ્તિમદન્વયવ્યતિરેકિ । યથા વહ્નૌ
સાધ્યે ધૂમવત્ત્વમ્ । યત્ર ધૂમસ્તત્રાગ્નિયર્થા મહાનસ ઇત્યન્વયવ્યાપ્તિઃ ।
યત્ર વહ્નિર્નાસ્તિ તત્ર ધૂમોऽપિ નાસ્તિ યથા મહાહ્રદ ઇતિ
વ્યાપ્તિરેકવ્યાપ્તિઃ ॥ ૧૧॥

દીપિકા

લિઙ્ગં વિભજતે — લિઙ્ગમિતિ ॥ અન્વયવ્યતિરેકિણં લક્ષયતિ —
અન્વયેનેતિ ॥ હેતુસાધ્યયોર્વ્યાપ્તિરન્વયવ્યાપ્તિઃ,
તદભાવયોર્વ્યાપ્તિર્વ્યતિરેકવ્યાપ્તિઃ ।

અન્વયમાત્રવ્યાપ્તિકં કેવલાન્વયિ । યથા ઘટઃ અભિધેયઃ પ્રમેયત્વાત્
પટવત્ । અત્ર પ્રમેયત્વાભિધેયત્વયોઃ વ્યતિરેકવ્યાપ્તિર્નાસ્તિ, સર્વસ્યાપિ
પ્રમેયત્વાત્ અભિધેયત્વાચ્ચ ॥ ૧૨॥

દીપિકા

કેવલાન્વયિનો લક્ષણમાહ ——- અન્વયેતિ ॥ કેવલાન્વયિસાધ્યકં
લિઙ્ગં કેવલાન્વયિ । (વૃત્તિમત્) અત્યન્તાભાવાપ્રતિયોગિત્વં
કેવલાન્વયિત્વમ્ । ઈશ્વરપ્રમાવિષયત્વં સર્વપદાભિધેયત્વં ચ
સર્વત્રાસ્તીતિ વ્યતિરેકાભાવઃ ।

વ્યતિરેકમાત્રવ્યાપ્તિકં કેવલવ્યતિરેકિ, યથા પૃથિવીતરેભ્યો
ભિદ્યતે ગન્ધવત્ત્વાત્ । યદિતરેભ્યો ન ભિદ્યતે ન તદ્ગન્ધવત્ યથા
જલમ્ । ન ચેયં તથા । તસ્માન્ન તથેતિ । અત્ર યદ્ગન્ધવત્ તદિતરભિન્નમ્
ઇત્યન્વયદૃષ્ટાન્તો નાસ્તિ, પૃથિવીમાત્રસ્ય પક્ષત્વાત્ ॥ ૧૩॥

દીપિકા

કેવલવ્યતિરેકિણો લક્ષણમાહ — વ્યતિરેકેતિ ।
તદુદાહરતિ-યથેતિ । નન્વિતરભેદઃ પ્રસિદ્ધો વા ન વા । આદ્યે યત્ર

પ્રસિદ્ધસ્તત્ર હેતુસત્ત્વે અન્વયિત્વમ્, અસત્ત્વે અસાધારણ્યમ્ । દ્વિતીયે સાધ્યજ્ઞાનાભાવાત્કથં તદ્વિશિષ્ટાનુમિતિઃ । વિશેષણજ્ઞાનાભાવે વિશિષ્ટજ્ઞાનાનુદયાત્પ્રતિયોગિજ્ઞાનાભાવાદ્વ્યતિરેકવ્યાપ્તિજ્ઞાનમપિ ન સ્યાદિતિ ચેત્ ન । જલાદિત્રયોદશાન્યોન્યાભાવાનાં ત્રયોદશસુ પ્રત્યેકં પ્રસિદ્ધાનાં મેલનં પૃથિવ્યાં સાધ્યતે । તત્ર ત્રયોધત્વાવચ્છિન્નભેદાત્મક - સાધ્યસ્યૈકાધિકરણવૃત્તિત્વાભાવાન્નાન્વયિત્વાસાધારણ્યે । પ્રત્યેકાધિકરણપ્રસિદ્ધ્યા સાધ્યવિશિષ્ટાનુમિતિઃ વ્યતિરેકવ્યાપ્તિનિરૂપણં ચેતિ ।

સન્દિગ્ધસાધ્યવાન્ પક્ષઃ । યતા ધૂમવત્ત્વે હેતૌ પર્વતઃ ॥ ૧૪॥

દીપિકા

પક્ષલક્ષણમાહ ——- સન્દિગ્ધેતિ ॥ નનુ શ્રવણાન્તરભાવિમનનસ્થલે અવ્યાપ્તિઃ । તત્ર વેદવાક્યૈરાત્મનો નિશ્ચિત્વેન સન્દેહાભાવાત્ । કિઞ્ચ પ્રત્યક્ષેઽપિ વહ્નૌ યત્રેચ્છયાનુમિતિસ્તત્રાવ્યાપ્તિરિતિ ચેત્ ન, ઉક્તપક્ષતાશ્રયત્વસ્ય પક્ષલક્ષણત્વાત્ ।

નિશ્ચિતસાધ્યવાન્ સપક્ષઃ, યથા તત્રૈવ મહાનસમ્ ॥ ૧૫॥

દીપિકા

સપક્ષલક્ષણમાહ ——– નિશ્ચિતેતિ ॥

નિશ્ચિતસાધ્યાઽભાવવાન્ વિપક્ષઃ । યથા તત્રૈવ મહાહ્રદઃ ॥ ૧૬॥

દીપિકા

વિપક્ષલક્ષણમાહ —– નિશ્ચિતેતિ ॥

સવ્યભિચારવિરુદ્ધસત્પ્રતિપક્ષાસિદ્ધબાધિતાઃ પઞ્ચ હેત્વાભાસાઃ ॥ ૧૭॥

દીપિકા

એવં સદ્ધેતૂન્નિરૂપ્ય અસદ્ધેતૂન્નિરૂપયિતું વિભજતે ——
સવ્યભિચારેતિ ॥ અનુમિતિપ્રતિબન્ધકયથાર્થજ્ઞાનવિષયત્વં હેત્વાભાસત્વમ્ ।

સવ્યભિચારઃ અનૈકાન્તિકઃ । સ ત્રિવિધઃ સાધારણાસાધારણાનુપસંહારિભેદાત્ ॥ ૧૮॥

દીપિકા

સવ્યભિચારં વિભજતે —- સ ત્રિવિધ ઇતિ ॥

તત્ર સાધ્યાભાવવદ્વૃત્તિઃ સાધારણઃ અનૈકાન્તિકઃ, યથા પર્વતો
વહ્નિમાન્ પ્રમેયત્વાત્ ઇતિ । પ્રમેયત્વસ્ય વહ્ન્યભાવવતિ હ્રદે વિદ્યમાનત્વાત્ ॥ ૧૯॥

દીપિકા

સાધારણં લક્ષયતિ —– તત્રેતિ ॥ ઉદાહરતિ —- યથેતિ ॥

સર્વસપક્ષવિપક્ષવ્યાવૃત્તઃ પક્ષમાત્રવૃત્તિઃ અસાધારણઃ । યથા
શબ્દો નિત્યઃ શબ્દત્વાત્ ઇતિ । શબ્દત્વં હિ સર્વેભ્યો
નિત્યેભ્યોઽનિત્યેભ્યશ્ચ વ્યાવૃત્તં શબ્દમાત્રવૃત્તિઃ ॥ ૨૦॥

દીપિકા

અસાધારણં લક્ષયતિ —– સર્વેતિ ॥

અન્વયવ્યતિરેકદૃષ્ટાન્તરહિતોઽનુપસંહારી । યથા સર્વમનિત્યં
પ્રમેયત્વાદિતિ । અત્ર સર્વસ્યાપિ પક્ષત્વાત્ દૃષ્ટાન્તો નાસ્તિ ॥ ૨૧॥

દીપિકા

અનુપસંહારિણો લક્ષણમાહ ——– અન્વયેતિ ॥

સાધ્યાભાવવ્યાપ્તો હેતુર્વિરૂદ્ધઃ । યથા શબ્દો નિત્યઃ કૃતકત્વાદિતિ ।
કૃતકત્વં હિ નિત્યત્વાભાવેનાઽનિત્યત્વેન વ્યાપ્તમ્ ॥ ૨૨॥

દીપિકા

વિરૂદ્ધં લક્ષયતિ —– સાધ્યેતિ ॥

યસ્ય સાધ્યાભાવસાધકં હેત્વન્તરં વિદ્યતે સ સત્પ્રતિપક્ષઃ । યથા
શબ્દો નિત્યઃ શ્રાવણત્વાત્ શબ્દત્વવત્ । શબ્દોઽનિત્યઃ કાર્યત્વાત્ ઘટવત્ ॥ ૨૩॥

દીપિકા

સત્પ્રતિપક્ષં લક્ષયતિ —- યસ્યેતિ ॥

અસિદ્ધસ્ત્રિવિધઃ —- આશ્રયાસિદ્ધઃ, સ્વરૂપાસિદ્ધો
વ્યાપ્યત્વાસિદ્ધશ્ચેતિ ॥ ૨૪॥

દીપિકા

અસિદ્ધં વિભજતે — અસિદ્ધ ઇતિ ॥

આશ્રયાસિદ્ધો યથા ગગનારવિન્દં સુરભિ અરવિન્દત્વાત્ સરોજારવિન્દત્ । અત્ર

ગગનારવિન્દમાશ્રયઃ સ ચ નાસ્ત્યેવ ॥ ૨૫॥

દીપિકા

આશ્રયાસિદ્ધમુદાહરતિ — ગગનેતિ ॥

સ્વરૂપાસિદ્ધો યથા શબ્દો ગુણશ્ચાક્ષુષત્વાત્ । અત્ર ચાક્ષુષત્વં શબ્દં નાસ્તિ શબ્દસ્ય શ્રાવણત્વાત્ ॥ ૨૬॥

દીપિકા

સ્વરૂપાસિદ્ધમુદાહરતિ — યથેતિ ॥

સોપાધિકો હેતુઃ વ્યાપ્યત્વાસિદ્ધઃ । સાધ્યવ્યાપકત્વે સતિ સાધનાવ્યાપકત્વં ઉપાધિઃ । સાધ્યસમાનાધિકરણાત્યન્તાભાવાપ્રતિયોગિત્વં સાધ્યવ્યાપકત્વમ્ । સાધનવન્નિષ્ઠાત્યન્તાભાવપ્રતિયોગિત્વં સાધનાવ્યાપકત્વમ્ । પર્વતો ધૂમવાન્વહ્નિમત્વાદિત્યત્ર આર્દ્રેન્ધનસંયોગ ઉપાધિઃ । તથાહિ । યત્ર ધૂમસ્તત્રાર્દ્રેન્ધનસંયોગ ઇતિ સાધ્યવ્યાપકતા । યત્ર વહ્નિસ્તત્રાર્દ્રેન્ધનસંયોગો નાસ્તિ અયોગોલકે આર્દ્રેન્ધનસંયોગાભાવાદિતિ સાધનાવ્યાપકતા । એવં સાધ્યવ્યાપકત્વે સતિ સાધનાવ્યાપકત્વાદાર્દ્રેન્ધનસંયોગ ઉપાધિઃ । સોપાધિકત્વાત્ વહ્નિમત્ત્વં વ્યાપ્યત્વાસિદ્ધમ્ ॥ ૨૭॥

દીપિકા

વ્યાપ્યત્વાસિદ્ધસ્ય લક્ષણમાહ — સોપાધિક ઇતિ ॥ ઉપાધેર્લક્ષણમાહ — સાધ્યેતિ ॥ ઉપાદિશ્ચતુર્વિધઃ કેવલસાધ્યવ્યાપકઃ, પક્ષધર્માવચ્છિન્નસાધ્યવ્યાપકઃ, સાધનાવચ્છિન્નસાધ્યવ્યાપકઃ, ઉદાસીનધર્માવચ્છિન્નસાધ્યવ્યાપકશ્ચેતિ । આદ્યઃ આર્દ્રેન્ધનસંયોગઃ । દ્વિતીયો યથા વાયુઃ પ્રત્યક્ષઃ પ્રત્યક્ષસ્પર્શાશ્રયત્વાત્ ઇત્યત્ર બહિર્દ્રવ્યત્વાવચ્છિન્નપ્રત્યક્ષત્વવ્યાપકમુદ્ભૂતરૂપવત્ત્વમ્ । તૃતીયો યથા — પ્રાગભાવો વિનાશી જન્યત્વાદિત્યત્ર જન્યત્વાવચ્છિન્નાનિત્યત્વવ્યાપકં ભાવત્વમ્ । ચતુર્થો યથા — પ્રાગભાવો વિનાશી પ્રમેયત્વાત્ ઇત્યત્ર જન્યત્વાવચ્છિન્નાનિત્યત્વવ્યાપકં ભાવત્વમ્ ।

યસ્ય સાધ્યાભાવઃ પ્રમાણાન્તરેણ નિશ્ચિતઃ સ બાધિતઃ । યથા વહ્નિરનુષ્ણો દ્રવ્યત્વાત્ જલવત્ । અત્રાનુષ્ણત્વં સાધ્યં તદભાવ ઉષ્ણત્વં

સ્પર્શનપ્રત્યક્ષેણ ગુહ્યાત ઇતિ બાધિતત્વમ્ ॥ ૨૮॥

દીપિકા

બાધિતસ્ય લક્ષણમાહ —- યસ્યેતિ ॥ અત્ર બાધસ્ય ગ્રાહ્યાભાવનિશ્ચયત્વેન, સત્પ્રતિપક્ષસ્ય વિરોધિજ્ઞાનસામગ્રીત્વેન સાક્ષાદનુમિતિપ્રતિબન્ધકત્વમ્ । ઇતરેષાં તુ પરામર્શપ્રતિબન્ધકત્વમ્ । તત્રાપિ સાધારણસ્યાવ્યભિચારાભાવરૂપતયા, વિરૂદ્ધસ્ય સમાનાધિકરણ્યાભાવતયા વ્યાપ્યત્વાસિદ્ધસ્ય વિશિષ્ટવ્યાપ્ત્યભાવતયા, અસાધારણનુપસંહારિણોઃ વ્યાપ્તિસંશયાધાયકત્વેન વ્યાપ્તિજ્ઞાનપ્રતિબન્ધકત્વમ્, આશ્રયાસિદ્ધિસ્વરૂપાસિદ્ધયોઃ પક્ષધર્મતાજ્ઞાનપ્રતિબન્ધકત્વમ્ । ઉપાધિસ્તુ વ્યભિચારજ્ઞાનદ્વારા વ્યાપ્તિજ્ઞાનપ્રતિબન્ધકઃ । સિદ્ધસાધનં તુ પક્ષતાવિઘટકતયા આશ્રયાસિદ્ધાવન્તર્ભવતીતિ પ્રાચ્યઃ । નિગ્રહસ્થાનાન્તરમિતિ નવીનાઃ ॥

## અથ ષષ્ઠોઽધ્યાય ।

ઉપમિતિકરણમુપમાનમ્ । સંજ્ઞાસંજ્ઞિસમ્બન્ધજ્ઞાનમુપમિતિઃ । તત્કરણં સાદૃશ્યજ્ઞાનમ્ । અતિદેશવાક્યાર્થસ્મરણમવાન્તર વ્યાપારઃ । તથા હિ કશ્ચિદ્ગવયશબ્દાર્થમજાનન્ કુતિશ્ચિત્ આરણ્યકપુરુષાદ્ગોસદૃશો ગવય ઇતિ શ્રુત્વા વનં ગતો વાક્યાર્થં સ્મરન્ ગોસદૃશં પિણ્ડં પશ્યતિ । તદન્તરમસૌ ગવયશબ્દવાચ્ય ઇત્યુપમિતિરુત્પદ્યતે ॥ ૧॥

દીપિકા

ઉપમાનં લક્ષયતિ —- ઉપમિતિકરણમિતિ ॥

## અથ સપ્તમોઽધ્યાય ।

આપ્તવાક્યં શબ્દઃ । આપ્તસ્તુ, યથાર્થવક્તા । વાક્યં પદસમૂહઃ । યથા ગામાનયેતિ । શક્તં પદમ્ । અસ્માત્પદાત્ અયમર્થો બોદ્ધવ્ય ઇતીશ્વરસંકેતઃ શક્તિઃ ॥ ૧॥

દીપિકા

શબ્દં લક્ષયતિ — આપ્તેતિ ॥ આપ્તં લક્ષયતિ — આપ્તસ્ત્વિતિ ॥

વાક્યલક્ષણમાહ —- વાક્યમિતિ ॥ પદલક્ષણમાહ — શક્તમિતિ ॥

અર્થસ્મૃત્યનુકૂલપદપદાર્થસંબન્ધઃ શક્તિઃ । સા ચ પદાર્થાન્તરમિતિ મીમાંસકાઃ । તન્નિરાસાર્થમાહ — અસ્માદિતિ ॥ ડિત્થાદીનામિવ ઘટાદીનામપિ સંકેત એવ શક્તિઃ ન તુ પદાર્થાન્તરમિત્યર્થઃ । નનુ ગવાદિપદાનાં જાતાવેવ શક્તિઃ, વિશેષણતયા જાતેઃ પ્રથમમુપસ્થિત્વાત્ । વ્યક્તિલાભાસ્તુ આક્ષેપાદિતિ કેચિત્ । તત્ ન, ગામાન્યેત્યાદૌ વૃદ્ધવ્યવહારેણ સર્વત્રાનયનાદેર્વ્યક્તાવેવ સંભવેન, જાતિવિશિષ્ટવ્યક્તાવેવ શક્તિકલ્પનાત્ । શક્તિગ્રહશ્ચ વૃદ્ધવ્યવહારેણ । વ્યુત્પિત્સુર્બાલો ‘ગામાનય’ ઇત્યુત્તમવૃદ્ધવાક્યશ્રવણાન્તરં મધ્યમવૃદ્ધસ્ય પ્રવૃત્તિમુપલભ્ય ગવાનયનં ચ દૃષ્ટ્વા મધ્યમવૃદ્ધપ્રવૃત્તિજનકજ્ઞાનસ્યાન્વયવ્યતિરેકાભ્યાં વાક્તજન્યત્વં નિશ્ચિત્ય ‘અશ્વમાનય ગાં બધાન’ ઇતિ વાક્યાન્તરે આવાપોદ્વાપાભ્યાં ગોપદસ્ય ગોત્વવિશિષ્ટે શક્તિઃ, અશ્વપદસ્ય અશ્વત્વવિશિષ્ટે શક્તિરિતિ વ્યુત્પદ્યતે । નનુ સર્વત્ર કાર્યપરત્વાદ્વ્યવહારસ્ય કાર્યપરવાક્ય એવ વ્યુત્પર્ત્તિન સિદ્ધપર ઇતિ ચેત્ ન । “કાશ્યાં ત્રિભુવન્તિલકો ભૂપતિરાસ્તે” ઇત્યાદૌ સિદ્ધેઽપિ વ્યવહારાત્, ‘ વિકસિતપદ્મે મધુકરસ્તિષ્ઠતિ” ઇત્યાદૌ પ્રસિદ્ધપદસમભિવ્યવહારાત્સિદ્ધેઽપિ મધુકરાદિવ્યુત્પત્તિદર્શનાચ્ચ । લક્ષણાપિ શબ્દવૃત્તિઃ । શક્યસંબન્દો લક્ષણા । ગઙ્ગાયાં ઘોષ ઇત્યત્ર ગઙ્ગાપદવાચ્યપ્રવાહસંબન્ધાદેવ તીરોપસ્થિતૌ તીરેઽપિ શક્તિર્ન કલ્પ્યતે । સૈધવાદૌ લવણાશ્વયોઃ પરસ્પરસંબન્ધાભાવાન્નાનાશક્તિકલ્પનમ્ । લક્ષણા ત્રિવિધા —- જહલ્લક્ષણા, અજહલ્લક્ષણા, જહદજલ્લક્ષણા ચેતિ । યત્ર વાચ્યાર્થસ્યાન્વયાભાવઃ તત્ર જહલ્લક્ષણા । યથા મઞ્ચાઃ ક્રોશન્તીતિ । યત્ર વાચ્યાર્થસ્યાપ્યન્વયઃ, તત્ર અજહદિતિ । યથા છત્રિણો ગચ્છન્તીતિ । યત્ર વાચ્યૈકદેશત્યાગેન એકદેશાન્વયઃ, તત્ર જહદજહદિતિ । યથા તત્ત્વમસીતિ । ગૌણ્યપિ લક્ષણૈવ લક્ષ્યમાણગુણસંબન્ધસ્વરૂપા યથા અગ્નિર્માણવક ઇતિ । વ્યઞ્જનાપિ શક્તિલક્ષણાન્તર્ભૂતા, શબ્દશક્તિમૂલા અર્થશક્તિમૂલા ચ । અનુમાનાદિના અન્યથાસિદ્ધા । તાત્પર્યાનુપપત્તિર્લક્ષણાબીજમ્ ।

તત્પ્રીતીતીચ્છયોચ્ચરિતત્વં તાત્પર્યમ્ । તાત્પર્યજ્ઞાનઞ્ચ વાક્યાર્થજ્ઞાને હેતુઃ નાનાર્થાનુરોધાત્ । પ્રકરણાદિકં તાત્પર્યગ્રાહકમ્ । દ્વારમિત્યાદૌ પિધેહીતિ શબ્દાધ્યાહારઃ । નનુ અર્થજ્ઞાનાર્થત્વાચ્છબ્દસ્યાર્થમવિજ્ઞાય શબ્દાધ્યાહારાસંભવાદર્થાધ્યાહાર એવ યુક્ત ઇતિ ચેત્ ન । પદવિશેષજન્યપદાર્થોપસ્તિથેઃ શાબ્દજ્ઞાને હેતુત્વાત્ । અન્યથા ' ઘટઃ કર્મત્વમાનયં કૃતિઃ" ઇત્યત્રાપિ શાબ્દજ્ઞાનપ્રસઙ્ગાત્ । પઙ્કજાદિપદેષુ યોગરૂઢિઃ । અવયવશક્તિર્યોગઃ । સમુદાયશક્તી રૂઢિઃ । નિયતપદ્મત્વાદિજ્ઞાનાર્થં સમુદાયશક્તિઃ । અન્યથા કુમુદેઽપિ પ્રયોગપ્રસઙ્ગાત્ । "ઇતરાન્વિતે શક્તિઃ" ઇતિ પ્રાભાકરાઃ । અન્વયસ્ય વાક્યાર્થતયા ભાનસમ્ભવાદન્વયાંશેઽપિ શક્તિર્ન કલ્પનીયા ઇતિ ગૌતમીયાઃ ।

આકાંક્ષા યોગ્યતા સંનિધિશ્ચ વાક્યાર્થજ્ઞાનહેતુઃ પદસ્ય પદાન્તરવ્યતિરેકપ્રયુક્તાન્વયાનનુભાવકત્વમ્ આકાંક્ષા । અર્થાબાધો યોગ્યતા । પદાનામવિલમ્બેનોચ્ચારણં સંનિધિઃ ॥ ૨॥

દીપિકા

આકાંક્ષેતિ ॥ આકાઙ્ક્ષાદિજ્ઞાનમિત્યર્થઃ । અન્યથા આકાંક્ષાદિભ્રમાચ્છાબ્દભ્રમો ન સ્યાત્ । આકાઙ્ક્ષાં લક્ષયતિ — પદસ્યેતિ ॥ યોગ્યતાલક્ષણમાહ —- અર્થેતિ ॥ સંનિધિલક્ષણમાહ —- પદાનામિતિ । અવિલમ્બેન પદાર્થોપસ્થિતિઃ સંનિધિઃ । ઉચ્ચારણં તુ તદુપયોગિતયોક્તમ્ ।

આકાંક્ષાદિરહિતં વાક્યપ્રમાણમ્ । યથા ગૌરશ્વઃ પુરૂષો હસ્તીતિ ન પ્રમાણમાકાંક્ષાવિરહાત્ । અગ્નિના સિઞ્ચેદિતિ ન પ્રમાણં યોગ્યતાવિરહાત્ । પ્રહરે પ્રહરેઽસહોચ્ચારિતાનિ ગામાનયેત્યાદિપદાનિ ન પ્રમાણં સાંનિધ્યાભાવાત્ ॥ ૩॥

દીપિકા

ગૌરશ્વ ઇતિ ॥ ઘટકર્મત્વમિત્યપ્યનાકાંક્ષોદાહરણં દ્રષ્ટવ્યમ્ ।

વાક્યં દ્વિવિધમ્ । વૈદિકં લૌકિકં ચ । વૈદિકમીશ્વરોક્તત્વાત્સર્વમેવ પ્રમાણમ્ । લૌકિકં ત્વાપ્તોક્તં પ્રમાણમ્ । અન્યદપ્રમાણમ્ ॥ ૪॥

દીપિકા

વાક્યં વિભજતે — વાક્યમિતિ ॥ વૈદિકસ્ય વિશેષમાહ —
વૈદિકમીશ્વરોક્તત્વાદિતિ ॥ નનુ વેદસ્યાનાદિત્વાત્કથમીશ્વરોક્તત્વમિતિ ચેત્
ન । "વેદઃ પૌરુષેયઃ વાક્યસમૂહત્વાત્ ભારતાદિવત્" ઇત્યનુમાનેન
પૌરુષેયત્વસિદ્ધેઃ । ન ચ સ્મર્યમાણકર્તૃકત્વમુપાધિઃ,
ગૌતમાદિભિઃ શિષ્યપરમ્પરયા વેદેઽપિ સકર્તૃકત્વસ્મરણેન
સાધનવ્યાપકત્વાત્ । "તસ્માત્તેપાનાત્ત્રયો વેદા અજાયન્ત" ઇતિ
શ્રુતેશ્ચ । નનુ વર્ણા નિત્યાઃ, સ એવાયં ગકાર ઇતિ પ્રત્યભિજ્ઞાબલાત્ ।
તથા ચ કથં વેદસ્યાનિત્યત્વમિતિ ચેત્ ન, "ઉત્પન્નો ગકારો
વિનિષ્ટો ગકાર ' ઇત્યાદિપ્રતીત્યા વર્ણાનામનિત્યત્વાત્, "સોઽયં
ગકાર ' ઇતિ પ્રત્યભિજ્ઞાયાઃ "સીયં દીપજ્વાલા '
ઇતિવત્સાજાત્યાવલમ્બનત્વાત્, વર્ણાનાં
નિત્યત્વેઽપ્યાનુપૂર્વીવિશિષ્ટવાક્યસ્યાનિત્યત્વાચ્ચ । તસ્માદીશ્વરોક્તા વેદાઃ ।
મન્વાદિસ્મૃતીનામાચારાણાં ચ વેદમૂલકતયા પ્રમાણ્યમ્ ।
સ્મૃતિમૂલવાક્યાનામિદાનીમનધ્યયનાત્તન્મૂલભૂતા કાચિચ્છારવોત્સન્નેતિ
કલ્પ્યતે । નનુ પઠ્યમાનવેદવાક્યોત્સાદનસ્ય કલ્પયિતુમશક્યતયા
વિપ્રકીર્ણવાદસ્યાયુક્તત્વાન્નિત્યાનુમેયો વેદો મૂલમિતિ ચેત્ ન, તથા સતિ
કદાપિ વર્ણાનામાનુપૂર્વીજ્ઞાનાસંભવેન બોધકત્વાસ/ન્ભવાત્ ।

વાક્યાર્થજ્ઞાનં શાબ્દજ્ઞાનમ્ । તત્કરણં શબ્દઃ ॥ ૫ ॥

દીપિકા

નનુ એતાનિ પદાનિ સ્મારિતાર્થસંસર્ગવન્તિ આકાંક્ષાદિમત્પદકદમ્બકત્વાત્
મદ્વાક્યવત્ ઇત્યનુમાનાદેવ સંસર્ગજ્ઞાસંભવાચ્છબ્દો ન
પ્રમાણાન્તરમિતિ ચેન્ન । અનુમિત્યપેક્ષયા વિલક્ષણસ્ય શાબ્દજ્ઞાનસ્ય
"શાબ્દાત્પ્રત્યેમિ" ઇત્વનુવ્યવસાયંસાક્ષિકસ્ય સર્વસંમતત્વાત્ ।
નન્વર્થાપત્તિરપિ પ્રમાણાન્તરમસ્તિ "પીનો દેવદત્તો દિવા ન ભુઙ્ક્તે
' ઇતિ દૃષ્ટે શ્રુતે વા પીનત્વાન્યથાનુપપત્ત્યા
રાત્રિભોજનમર્થાપત્ત્યા કલ્પ્યત ઇતિ ચેન્ન । "દેવદત્તો રાત્રૌ
ભુઙ્ક્તે દિવાઽભુઞ્જાનત્વે સતિ પીનત્વાત્" ઇત્યનુમાનેનૈવ
રાત્રિભોજનસ્ય સિદ્ધત્વાત્ । શતે પઞ્ચાશદિતિ સમ્ભવોઽપ્યનુમાનમેવ ।
"ઇહ વટે યક્ષસ્તિષ્ઠતિ" ઇત્યૈતિહ્યમપિ
અજ્ઞાતમ્લવક્તૃકશબ્દ એવ । ચેષ્ટાપિ શબ્દાનુમાનદ્વારા વ્યવહારહેતુરિતિ
ન પ્રમાણાન્તરમ્ । તસ્માત્પ્રત્યક્ષાનુમાનોપમાનશબ્દાશ્ચત્વાર્યેવ પ્રમાણાનિ ॥

# અથ અષ્ટમોऽધ્યાય । NaiyAyikA theory on epistemology

જ્ઞાનાનાં તદ્વતિ તત્પ્રકારકત્વં સ્વતોગ્રાહ્યં પરતો વેતિ વિચાર્યતે ।
તત્ર વિપ્રતિપત્તિઃ —— જ્ઞાનપ્રામાણ્યં
તદપ્રામાણ્યાગ્રાહકયાવજ્જ્ઞાનગ્રાહકસામગ્રીગ્રાહ્યં ન વા ઇતિ । અત્ર
વિધિકોટિઃ સ્વતસ્ત્વમ્ । નિષેધકોટિઃ પરતસ્ત્વમ્ । અનુમાનાદિગ્રાહ્યત્વેન
સિદ્ધસાધનવારણાય યાવદિતિ ।" ઇદં જ્ઞાનમપ્રમા "ઇતિ જ્ઞાનેન
પ્રામાણ્યાગ્રહાદ્બાધવારણાય —– અપ્રામાણ્યાગ્રાહકેતિ ॥

ઇદં જ્ઞાનમપ્રમા ઇત્યનુવ્યવસાયનિષ્ઠપ્રામાણ્યગ્રાહકસ્યાપિ
અપ્રામાણ્યાગ્રાહકત્વાભાવાત્સ્વતસ્ત્વં ન સ્યાદતસ્તદિતિ ।
તસ્મિન્ગ્રાહ્યપ્રામાણ્યાશ્રયેऽપ્રામાણ્યાગ્રાહિકેત્યર્થઃ । ઉદાહૃતસ્થલે
વ્યવસાયાપ્રામાણ્યગ્રાહકસ્યાપ્યનુવ્યવસાયે તદ્ગ્રાહકત્વાત્સ્વતસ્ત્વસિદ્ધિઃ ।
નનુ સ્વત એવ પ્રામાણ્યં ગૃહ્યતે, "ઘટમહં જાનામિ '
ઇત્યનુવ્યવસાયેન ઘટઘટત્વયોરિવ તત્સંબન્ધસ્યાપિ વિષયીકરણાત્
વ્યવસાયરૂપ પ્રત્યાસત્તેસ્તુલ્યત્વાત્ । પુરોવર્તિનિ પ્રકારસંબન્ધસ્યૈવ
પ્રમાત્વપદાર્થત્વાદિતિ ચેત્ ન । સ્વતઃપ્રામાણ્યગ્રહે "જલજ્ઞાનં પ્રમા
ન વા" ઇત્યનભ્યાસદશાયાં પ્રમાત્વસંશયો ન સ્યાત્ । અનુવ્યવસાયેન
પ્રામાણસ્ય નિશ્ચિતત્વાત્ । તસ્માત્સ્વતોગ્રાહ્યત્વાભાવાત્પરતો ગ્રાહ્યત્વમેવ ।
તથાહિ । પ્રથમં જલજ્ઞાનાન્તરં પ્રવૃત્તૌ સત્યાં જલલાભે સતિ
પૂર્વોત્પન્નં જલજ્ઞાનં પ્રમા સફલપ્રવૃત્તિજનકત્વાત્ યન્નૈવં
તન્નૈવં યથા અપ્રમા ઇતિ વ્યતિરેકિણા પ્રમાત્વં નિશ્ચીયતે ।
દ્વિતીયાદિજ્ઞાનેષુ પૂર્વજ્ઞાનદૃષ્ટાન્તેન
તત્સજાતીયત્વલિઙ્ગેનાન્વયવ્યતિરેકિણાપિ ગૃહ્યતે । પ્રમાયા
ગુણજન્યત્વમુત્પત્તૌ પરતસ્ત્વમ્ । પ્રમાસાધારણકારણં ગુણઃ,
અપ્રમાસાધારણકારણં દોષઃ । તત્ર પ્રત્યક્ષે
વિશેષણવદ્વિશેષ્યસંનિકર્ષો ગુણઃ । અનુમિતૌ વ્યાપકવતિ
વ્યાપ્યજ્ઞાનમ્ । ઉપમિતૌ યથાર્થસાદૃશ્યજ્ઞાનમ્ । શાબ્દજ્ઞાને
યથાર્થયોગ્યતાજ્ઞાનમ્ । ઇત્યાદ્યૂહનીયમ્ । પુરોવર્તિનિ
પ્રકારાભાવસ્યાનુવ્યવસાયેનાનુપસ્થિતત્વાદપ્રમાત્વં પરત એવ ગૃહ્યતે ।
પિત્તાદિદોષજન્યત્વમુત્પત્તૌ પરતસ્ત્વમ્ । નનુ સર્વેષાં જ્ઞાનાનાં
યથાર્થત્વાદયથાર્થજ્ઞાનમેવ નાસ્તીતિ । ન ચ "શુક્તાવિદં રજતમ્"

ઇતિ જ્ઞાનાત્પ્રવૃત્તિદર્શનાદન્યથાખ્યાતિસિદ્ધિરિતિ વાચ્યમ્ ।
રજતસ્મૃતિપુરોવર્તિજ્ઞાનાભ્યામેવ પ્રવૃત્તિસંભવાત્ ।
સ્વતન્ત્રોપસ્થિતેષ્ટભેદાગ્રહસ્યૈવ સર્વત્ર પ્રવર્તકત્વેન “નેદં
રજતમ્” ઇત્યાદૌ અતિપ્રસઙ્ગાભાવાદિતિ ચેત્ ન । સત્યરજસ્થલે
પુરોવર્તિવિશેષ્યકરજતત્વપ્રકારકજ્ઞાનસ્ય લાઘવેન
પ્રવૃત્તિજનકતયા શુક્તાવપિ રજતાર્થિ પ્રવૃત્તિજનકત્વેન
વિશિષ્ટજ્ઞાનસ્યૈવ કલ્પનાત્ ।

Encoded by Ashish Chandra ashish_chandr70@hotmail.com

The author of Tarka Sangraha, along with its Dipika is Annambhatta . This is a very well known work and most Vedantins today consider it as the stepping stone to understand the Nyaya-Vaisheshika, systems of logic.

---

*Tarka Sangraha 1-8*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*